# प्रश्नोपनिषद्भाष्यम्

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।

स्थिरैरङ्गैस्तुष्टुवाँ ्सस्तनूभिः। व्यशेम देवहितं यदायुः।

स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।

स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु।

ॐ शान्तिः शान्तिः शान्तिः ।। ९ ।।

# प्रश्नः १

मन्त्रोक्तस्य अर्थस्य विस्तरानुवादीदं ब्राह्मणमारभ्यते। ऋषि-प्रश्न-प्रतिवचनाख्यायिका तु विद्या-स्तुतये।

एवं संवत्सर-ब्रह्मचर्य-संवासादियुक्तैः तपोयुक्तैः[1] ग्राह्या, पिप्पलादादिवत् सर्वज्ञ-कल्पैः आचार्यैः

वक्तव्या च, न येन केनचिदिति विद्यां स्तौति।

ब्रह्मचर्यादि-साधन-सूचनाच्च तत्कर्तव्यता स्यात्।।

**ओम् सुकेशा च भारद्वाजः। शैब्यश्च सत्यकामः। सौर्यायणी च गार्ग्यः।**

**कौशल्यश्च आश्वलायनः। भार्गवो वैदर्भिः। कबन्धी कात्यायनः।**

**ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणाः।**

**एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादम् उपसन्नाः।। १ ।।**

---

[1] पा.भेद - संवत्सर-ब्रह्मचर्य-संवासादि-तपोयुक्तैः इति।

**सुकेशा** **च** नामतः। भरद्वाजस्यापत्यं **भारद्वाज**ः। **शैब्यश्च** शिबेरपत्यं शैब्यः। **सत्यकामः** नामतः।

**सौर्यायणी** सूर्यस्य अपत्यं सौर्यः तस्यापत्यं सौर्यायणिः। छान्दसः 'सौर्यायणी' इति।

**गार्ग्यः** गर्गगोत्रोत्पन्नः। **कौशल्यश्च** नामतः। अश्वलस्य अपत्यम् **आश्वलायन**ः।

**भार्गव**ः भृगोर्गोत्रापत्यं भार्गवः। **वैदर्भि**ः विदर्भे[2] भवः। **कबन्धी** नामतः कत्यस्यापत्यं **कात्यायनः**।

विद्यमानः प्रपितामहः यस्य सः। युव-प्रत्ययः। **ते** **ह** **एते** **ब्रह्मपरा**ः अपरं ब्रह्म परत्वेन गताः,

तदनुष्ठान-निष्ठाः च **ब्रह्मनिष्ठा**ः, **परं** **ब्रह्म** **अन्वेषमाणाः**।

किं तत्? यन्नित्यं विज्ञेयमिति तत्प्राप्त्यर्थं यथाकामं यतिष्यामः - इत्येवं तदन्वेषणं कुर्वन्तः तदधिगमाय

**एष** **ह** **वै** **तत्सर्वं** **वक्ष्यति** **इति** आचार्यम् उपजग्मुः। कथम्? **ते** **ह** **समित्पाणयो** समिद्भार-गृहीत-

हस्ताः सन्तः **भगवन्तं** पूजावन्तं **पिप्पलादम्** आचार्यम् **उपसन्ना**ः उपजग्मुः।। १ ।।

---

[2] पा.भेद - विदर्भेषु इति।

**तान्ह स ऋषिरुवाच। भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ। यथाकामं प्रश्नान् पृच्छत। यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति।। २ ।।**

**तान्** एवम् उपगतान् **ह** **स** खिल **ऋषिः** **उवाच** **भूय**ः पुनः **एव** यद्यपि यूयं पूर्वं तपस्विनः एव **तपसा** इन्द्रिय-संयमेन तथापि इह विशेषतः **ब्रह्मचर्येण** **श्रद्धया** च आस्तिक्य-बुद्ध्या आदरवन्तः **संवत्सरं** कालं **संवत्स्यथ** सम्यग् गुरु-शुश्रूषा-पराः सन्तः वत्स्यथ। ततो **यथाकामं** यो यस्य कामः तमनतिक्रम्य यथा-कामम्, यद्विषये यस्य जिज्ञासा तद्विषयान् **प्रश्नान्** **पृच्छत।** **यदि** तद्युष्मत्पृष्टं **विज्ञास्यामः**। अनुद्धतत्व-प्रदर्शनार्थः 'यदि'-शब्दः। न अज्ञान-संशयार्थः। प्रश्न-निर्णयाद् अवसीयते। **सर्वं** **ह** **वो** वः पृष्टं[3] **वक्ष्यामः** **इति**।। २ ।।

---

[3] पा.भेद - पृष्टार्थम् इति।

**अथ कबन्धी कात्यायनः उपेत्य पप्रच्छ। भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्त इति।। ३ ।।**

**अथ** संवत्सराद् ऊर्ध्वं **कबन्धी** **कात्यायनः** **उपेत्य** उपगम्य **पप्रच्छ** पृष्टवान्।

**हे** **भगवन्** **कुतः** कस्माद् **ह** **वा** इमाः ब्राह्मणाद्याः **प्रजाः** **प्रजायन्ते** उत्पद्यन्ते।

अपर-विद्या-कर्मणोः समुच्चितयोः  यत्कार्यं, या गतिः, तद्वक्तव्यमिति तदर्थोऽयं प्रश्नः।। ३ ।।

**तस्मै स होवाच। प्रजाकामः वै प्रजापतिः। स तपोऽतप्यत।**

**स तपस्तप्त्वा स मिथुनमुत्पादयते।**

**रयिं च प्राणं च इत्येतौ मे बहुधा प्रजाः करिष्यत इति।। ४ ।।**

**तस्मै** एवं पृष्टवते। **सः** **होवाच**। तदपाकरणायाह। **प्रजाकाम**ः प्रजा आत्मनः सिसृक्षुः **वै** **प्रजापति**ः सर्वात्मा सन् जगद् स्रक्ष्यामीत्येवं विज्ञानवान्, यथोक्तकारी, तद्भावभावितः, कल्पादौ निर्वृत्तः, हिरण्यगर्भः, सृज्यमानानां प्रजानानां स्थावर-जङ्गमानां पतिः सन् जन्मान्तर-भावितं ज्ञानं श्रुति-प्रकाशितार्थ-विषयं **तपः** अन्वालोचयद् **अतप्यत**। अथ तु **स** एवं **तपस्तप्त्वा** श्रौतं ज्ञानमन्वालोच्य सृष्टि-साधन-भूतं **मिथुनमुत्पादयते** मिथुनं द्वन्द्वम् उत्पादितवान्।

**रयिं** **च** सोममन्नं **प्राणं** **च** अग्निमत्तारम् **इति** **एतौ** अग्नीषोमौ अतृ-अन्न-भूतौ **मे** मम **बहुधा** अनेकधा **प्रजाः** **करिष्यतः** **इति** एवं संचिन्त्य, अण्डोत्पत्ति-क्रमेण सूर्याचन्द्रमसौ अकल्पयत्।। ४ ।।

**आदित्यो ह वै प्राणो रयिरेव चन्द्रमा रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तं च।**

**तस्मान्मूर्तिरेव रयिः।। ५ ।।**

तत्र **आदित्यो** **ह** **वै** **प्राणः** अत्ता अग्निः। **रयिरेव** **चन्द्रमा**ः। रयिरेवान्नं सोम एव।

तदेतदेकम् अत्ता अग्निः च, अन्नं च प्रजापतिरेकं तु मिथुनं गुण-प्रधान-कृतो भेदः।

कथम्? **रयिर्वा** अन्नं वा **एतत्सर्वम्**। किं तत्? **यन्मूर्तं** **च** स्थूलं च **अमूर्तं** **च** सूक्ष्मं च।

मूर्तामूर्ते अतृ-अन्न-रूपे अपि रयिरेव।

**तस्मात्** प्रविभक्ताद् अमूर्ताद् यदन्यन्मूर्त्त-रूपं **मूर्त्तिः** सा **एव** **रयिः** अन्नम्, अमूर्तेन अत्रा अद्यमानत्वात्।। ५ ।।

तथा अमूर्तोऽपि प्राणोऽत्ता सर्वमेव यच्चाऽऽद्यम्। कथम्?

**अथादित्य उदयन् यत्प्राचीं दिशं प्रविशति। तेन प्राच्यान् प्राणान् रश्मिषु संनिधत्ते।**

**यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदन्तरा दिशो यत्सर्वं प्रकाशयति।**

**तेन सर्वान् प्राणान् रश्मिषु संनिधत्ते।। ६ ।।**

**अथ** **आदित्य**: **उदयन्** उद्-गच्छन्, प्राणिनां चक्षुर्गोचरमागच्छन्। **यत्प्राचीं** **दिशं** स्व-प्रकाशेन **प्रविशति** व्याप्नोति। **तेन** स्वात्मव्याप्त्या सर्वांस्तत्स्थान् **प्राणान्** **प्राच्यान्** अन्तर्भूतान्[4]। **रश्मिषु** स्वात्मावभास-रूपेषु व्याप्तिमत्सु व्याप्तत्वात् प्राणिनः **संनिधत्ते** संनिवेशयति। आत्मभूतान्करोति इत्यर्थः। तथैव **यत्** प्रविशति **दक्षिणा**म्, **यत्** **प्रतीचम्,** **यदुदीचम्,** **अध** **ऊर्ध्वं** यत् प्रविशति **यच्चान्तरा** **दिशो** कोणदिशोऽवान्तरदिशः **यत्** च अन्यत् **सर्वं** **प्रकाशयति**। **तेन** स्व-प्रकाश-व्याप्त्या **सर्वान्** सर्वदिक्स्थान् प्राणान् **रश्मिषु** **संनिधत्ते**।। ६ ।।

[4] पा.भेद - अन्नभूतानिति।

**स एष वैश्वानरो विश्वरूपः प्राणोऽग्निः उदयते। तदेतद् ऋचाऽभ्युक्तम्।। ७ ।।**

**स** **एष**: **अत्ता** प्राणः **वैश्वानरः** सर्वात्मा **विश्वरूप**: विश्ववात्मत्वात् च **प्राण**: **अग्नि**: च।

स एव अत्ता **उदयते** उद्-गच्छति प्रत्यहं सर्वा दिश आत्मसात्कुर्वन्। **तदेतद्** उक्तं वस्तु **ऋचा** मन्त्रेण अपि **अभ्युक्तम्**।। ७ ।।

**विश्वरूपं हरिणं जातवेदसं परायणं ज्योतिरेकं तपन्तम्। सहस्त्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्यः।। ८ ।।**

**विश्वरूपं** सर्व-रूपं **हरिणं** रश्मिमन्तं **जातवेदसं** जात-प्रज्ञानं **परायणं** सर्व-प्राणाश्रयं **ज्योतिरेकं** सर्व-प्राणिनां चक्षुर्भूतम् अद्वितीयं **तपन्तं** ताप-क्रियां कुर्वाण्म्, स्वात्मानं सूर्यं सूरयो विज्ञातवन्तः ब्रह्म-विदः। कोऽसौ यं विज्ञातवन्तः? **सहस्त्ररश्मि**: अनेक-रश्मिः **शतधा** अनेकधा प्राणि-भेदेन **वर्तमान**: **प्राण**: **प्रजानाम्** **उदयत्येषः** **सूर्यः**।। ८ ।।

यश्चासौ चन्द्रमा मूर्त्तिः अन्नम् अमूर्त्तिः च प्राणः अत्ता आदित्यः तदेकम् एतद् मिथुनं सर्वम्।

कथं प्रजा करिष्यत इति? उच्यते -

**संवत्सरो वै प्रजापतिः। तस्यायने दक्षिणं चोत्तरं च।**

**तद्ये ह वै तदिष्टापूर्त्ते कृतमित्युपासते। ते चान्द्रमसमेव लोकमभिजयन्ते।**

**त एव पुनरावर्त्तन्ते तस्मादेते ऋषयः प्रजाकामाः दक्षिणं प्रतिपद्यन्ते।**

**एष ह वै रयिर्यः पितृयाणः।। ९ ।।**

तदेव कालः **संवत्सरः** **वै** **प्रजापति**ः तन्निर्वर्त्यत्वात् संवत्सरस्य।

चन्द्रादित्य-निर्वर्त्य-तिथ्यहोरात्र-समुदायो हि संवत्सरः, तदनन्यत्वाद् रयि-प्राण-मिथुनात्मक एव

इत्युच्यते। तत् कथम्? **तस्य** संवत्सरस्य प्रजापतेः **अयने** मार्गौ द्वौ **दक्षिणं** **चोत्तरं** **च**।

द्वे प्रसिद्धे ह्ययने षण्मास-लक्षणे याभ्यां दक्षिणेन उत्तरेण च याति सविता केवल-कर्मिणां ज्ञान-संयुक्त-कर्मवतां च लोकान् विदधत्।

कथम्? **तत्** तत्र च ब्राह्मणादिषु **ये ह वै** '**तद्**' उपासते इति क्रिया-विशेषणः द्वितीयस्तच्छब्दः।

इष्टं च पूर्त्तं च **इष्टापूर्त्ते** इत्यादि **कृतम्** एव **उपासते** नाकृतं नित्यम्।

ते **चान्द्रमसं** चन्द्रमसि भवं प्रजापतेर्मिथुनात्मकस्य अंशं रयिमन्नभूतं **लोकमभिजयन्ते** कृत-रूपत्वात् चान्द्रमसस्य। **ते** तत्रैव च कृत-क्षयात् **पुनरावर्त्तन्ते** इमं लोकं हीनतरं वा विशन्ति इति ह्युक्तम्।

यस्मादेवं प्रजापतिमन्नात्मकं फलत्वेन अभिनिर्वर्तयन्ति चन्द्रमिष्टापूर्त्तकर्मणा **एते ऋषयः** स्वर्ग-द्रष्टारः **प्रजाकामा**: प्रजार्थिनः, गृहस्थाः **तस्मात्** स्वकृतमेव (**दक्षिणम्**) दक्षिणायनोपलक्षितं चन्द्रं **प्रतिपद्यन्ते**।

**एष ह वै रयि**: अन्नं **य**: **पितृयाणः** पितृयाणोपलक्षितः चन्द्रः।। ९ ।।

**अथोत्तरेण तपसा ब्रह्म-चर्येण श्रद्धया विद्यया आत्मानमन्विष्य आदित्यमभिजयन्ते।**

**एतद्वै प्राणानामायतनम्। एतदमृतमभयम्। एतत् परायणम्।**

**एतस्मान्न पुनरावर्तन्ते इति। एष निरोधः। तदेष श्लोकः।। १० ।।**

**अथ** **उत्तरेण** अयनेन प्रजापतेः अंशं प्राणम् अत्तारम् आदित्यमभिजयन्ते।

केन? **तपसा** इन्द्रिय-जयेन। विशेषतो **ब्रह्मचर्येण** **श्रद्धया** **विद्यया** च।

प्रजापत्यात्मविषयया **आत्मानं** प्राणं सूर्यं जगतः तस्थुषश्च **अन्विष्य** अहमस्मि इति विदित्वा

**आदित्यमभिजयन्ते**। **एतद्वै** **आयतनं** सर्व-**प्राणानाम्** सामान्यम् आयतनम् आश्रयम्।

**एतदमृतम्** अविनाशी। **अभयम्** अत एव भय-वर्जितम्। न चन्द्रवत् क्षय-वृद्धि-भयवत्।

**एतत्** **परायणं** परा-गतिः विद्यावताम्, कर्मिणां च ज्ञानवताम्।

**एतस्माद्** **न** **पुनरावर्तन्ते** यथा इतरे केवल-कर्मिणः। **इति** यस्माद् **एषः** अविदुषां **निरोध**ः।

आदित्यात् हि निरुद्धा अविद्वांसः नैते संवत्सरमादित्यमात्मानं प्राणमभिप्राप्नुवन्ति।

स हि संवत्सरः कालात्मा अविदुषां निरोधः। **तत्** तत्र अस्मिन् अर्थे **एषः** **श्लोक**ः मन्त्रः।। १० ।।

**पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्। अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षडरे आहुरर्पितमिति।। ११ ।।**

**पञ्चपादं** पञ्चर्तवः पादा इवास्य संवत्सरात्मनः आदित्यस्य तैः असौ पादैः इव ऋतुभिः आवर्तते। हेमन्त-शिशिरौ एकीकृत्य इयं कल्पना। **पितरं** सर्वस्य जनयितृत्वात् पितृत्वं तस्य, तम्। **द्वादशाकृतिं** द्वादश मासाः आकृतयः अवयवाः आकरणं वा अवयवि-करणम् अस्य द्वादश-मासैः, तं द्वादशाकृतिम्। **दिवः** द्युलोकात् **परे** ऊर्ध्वे **अर्धे** स्थाने। तृतीयस्यां दिवि इत्यर्थः। **पुरीषिणं** पुरीषवन्तम् उदकवन्तम् **आहुः** कालविदः।। **अथ** तमेव **अन्ये** **इमे** **उ** **प**रे काल-विदः **विचक्षणं** निपुणम्, सर्वज्ञम्। **सप्तचक्रे** सप्त-हय-रूपेण चक्रे सततं गतिमति कालात्मनि। **षडरे** षड्-ऋतुमति। **आहुः** सर्वमिदं जगत्कथयन्ति। **अर्पितम्** अरा इव रथनाभौ निविष्टम् **इति**। यदि पञ्च-पादो द्वादशाकृतिः, यदि वा सप्त-चक्रः षडरः, सर्वथापि संवत्सरः कालात्मा प्रजापतिः चन्द्रादित्य-लक्षणः अपि जगतः कारणम्।। ११ ।।

**मासो वै प्रजापतिः। तस्य कृष्णपक्ष एव रयिः। शुक्लः प्राणः।**

**तस्मादेव ऋषयः शुक्ले इष्टं कुर्वन्ति। इतर इतरस्मिन्।। १२ ।।**

यस्मिन् इदं श्रितं[5] विश्वं स एव प्रजापतिः संवत्सराख्यः स्वावयवे मासे कृत्स्नः परिसमाप्यते।

**मासो वै प्रजापति**ः यथोक्त-लक्षणः एव मिथुनात्मकः **तस्य** मासात्मनः प्रजापतेः एको भागः **कृष्णपक्षः एव रयिः** अन्नं चन्द्रमाः। अपरो भागः **शुक्लः** शुक्लपक्षः **प्राणः** आदित्यः, अत्ता अग्निः।

यस्मात् शुक्लपक्षात्मानं प्राणं सर्वमेव पश्यन्ति **तस्मात्** प्राण-दर्शिनः **एते ऋषयः** कृष्ण-पक्षे अपि **इष्टं** यागं कुर्वन्तः **शुक्लपक्षे एव कुर्वन्ति**। प्राण-व्यतिरेकेण कृष्ण-पक्षः तैर्न दृश्यते।

यस्माद् **इतरे** तु प्राणं न पश्यन्ति इति अदर्शन-लक्षणं कृष्णात्मानमेव पश्यन्ति।

[6]**इतरस्मिन्** कृष्ण-पक्षे एव कुर्वन्ति, शुक्ले कुर्वन्तः अपि।। १२ ।।

---

[5] पा.भेद - श्रितमित्यस्य स्थाने प्रोतमिति।
[6] पा.भेद - इतरे इति अधिकं वा।

**अहोरात्रो वै प्रजापतिः। तस्याहरेव प्राणो रात्रिरेव रयिः।**

**प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते।**

**ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यन्ते।। १३ ।।**

सोऽपि मासात्मा **प्रजापतिः** स्वावयवे अहोरात्रे परिसमाप्यते **अहोरात्रो** **वै** **प्रजापतिः** पूर्ववत्।

**तस्य** अपि **अहरेव** **प्राणः** अत्ता, अग्निः। **रात्रिरेव** **रयिः** पूर्ववदेव। **प्राणम्** अहरात्मानं वा **एते** **प्रस्कन्दन्ति** निर्गमयन्ति, शोषयन्ति वा स्वात्मनः विच्छिद्य अपनयन्ति।

के? **ये** **दिवा** अहनि **रत्या** रति-कारण-भूतया सह स्त्रिया **संयुज्यन्ते** मैथुनम् आचरन्ति मूढाः।

यतः एवं तस्मात्तद् न कर्त्तव्यमिति प्रतिषेधः प्रासङ्गिकः। **यद्रात्रौ** **संयुज्यन्ते** **रत्या** ऋतौ **ब्रह्मचर्यमेव** **तद्** इति प्रशस्तत्वाद् रात्रौ[7] भार्या-गमनं कर्तव्यमिति। अयमपि प्रासङ्गिकः विधिः।

प्रकृतं तु उच्यते सः अहोरात्रात्मकः प्रजापतिः व्रीहि-यवाद्यन्नात्मना व्यवस्थितः।। १३ ।।

---

[7] पा.भेद - ऋतौ इति आनन्दाश्रमः।

**अन्नं वै प्रजापतिः। ततो ह वै तद्रेतः। तस्माद् इमाः प्रजाः प्रजायन्ते इति।। १४ ।।**

एवं क्रमेण परिणम्य तद् **अन्नं** **वै** **प्रजापतिः**। कथम्? **ततः** तस्माद् **ह** **वै** **रेतः** नृबीजम्।

**तत्** प्रजा-कारणम्। **तस्माद्** योषिति सिक्ताद् **इमाः** मनुष्यादि-लक्षणाः **प्रजाः** **प्रजायन्ते**।

यत्पृष्टं कुतो ह वै प्रजाः प्रजायन्ते इति। तदेवं चन्द्रादित्य-मिथुनादि-क्रमेण अहोरात्रान्तेन अन्नासृग्रेतोद्वारेण इमाः प्रजाः प्रजायन्ते इति निर्णीतम्।। १४ ।।

**तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते।**

**तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्रतिष्ठितम्।। १५ ।।**

**तद्** तत्र एवं सति **ये** गृहस्थाः। **ह** **वै** इति प्रसिद्ध-स्मरणार्थौ निपातौ।

**तत्** प्रजापतेः व्रतम् **प्रजापतिव्रतम्** ऋतौ भार्या-गमनम्। **चरन्ति** कुर्वन्ति। तेषां दृष्ट-फलम् इदम्।

किम्? **ते** **मिथुनं** पुत्रं दुहितरं च **उत्पादयन्ते।** अदृष्टं च फलम् इष्टापूर्त-दत्तकारिणां **तेषाम्** **एवैष**

यश्चान्द्रमसः **ब्रह्मलोक**ः पितृयाण-लक्षणः। **येषां** **तपः** स्नातक-व्रतादीनि, ब्रह्मचर्यम्।

ऋतौ अन्यत्र मैथुनासमाचरणम् **ब्रह्मचर्यम्**। **येषु** च **सत्यं** अनृत-वर्जनम्।

**प्रतिष्ठितम्** अव्यभिचारितया वर्तते नित्यमेव।। १५ ।।

**तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति।। १६ ।।**

यस्तु पुनः आदित्योपलक्षितः उत्तरायणः प्राणात्मभावः **विरजः** शुद्धः, न चन्द्र-ब्रह्मलोकवद् रजस्वलः

वृद्धि-क्षयादि-युक्तः असौ। केषाम्? **तेषाम्** इति उच्यते।

यथा गृहस्थानाम् अनेक-विरुद्ध-संव्यवहार-प्रयोजनवत्वाद् **जिह्मं** कौटिल्यम्, वक्र-भावः अवश्यंभावि

तथा **न** **येषु** जिह्मम्।

यथा च गृहस्थानां क्रीडा-नर्मादि-निमित्तम्[8] **अनृतम्** अवर्जनीयं तथा न येषु तत्।

तथा **माया** गृहस्थानाम् इव न येषु विद्यते।

माया नाम बहिरन्यथात्मानं प्रकाश्य अन्यथैव कार्यं करोति सा माया, मिथ्याचाररूपा।

माया-इत्येवमादयो दोषाः येषु अधिकारिषु[9] ब्रह्मचारि-वानप्रस्थ-भिक्षुषु निमित्ताभावाद् न विद्यन्ते।

तत्साधनानुरूपेण एव तेषाम् **असौ विरजो ब्रह्मलोकः** इत्येषा ज्ञान-युक्त-कर्मवतां गतिः।

पूर्वोक्तस्तु ब्रह्मलोकः केवल-कर्मिणां चन्द्र-लक्षणः इति।। १६ ।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये प्रथमः प्रश्नः)।।

---

[8] पा.भेद - क्रीडादिनर्मनिमित्तम् इति। क्रीडादिनिमित्तमिति वा।

[9] पा.भेद - अधिकारिषु इत्यस्य स्थाने एकाकिषु इति।

# प्रश्नः २

प्राणः अत्ता प्रजापतिः इत्युक्तम्। तस्य प्रजापतित्वमत्तृत्वं च अस्मिन् शरीरे अवधारयितव्यमिति अयं प्रश्नः आरभ्यते -

**अथ हैनं भार्गवो वैदर्भिः पप्रच्छ। भगवन् कत्येव देवाः प्रजां विधारयन्ते। कतर एतत् प्रकाशयन्ते। कः पुनः एषां वरिष्ठ इति।। १ ।।**

**अथ** अनन्तरं **ह** किल **एनं** **भार्गवः** **वैदर्भिः** **पप्रच्छ**। हे **भगवन्** **कत्येव** **देवा**ः **प्रजां** शरीर-लक्षणां **विधारयन्ते** विशेषेण धारयन्ते? **कतरे** बुद्धीन्द्रिय-कर्मेन्द्रिय-विभक्तानाम् **एतत्** प्रकाशनं स्व-माहात्म्य-प्रख्यापनं **प्रकाशयन्ते**? **क**ः असौ **पुन**ः **एषां** **वरिष्ठः** प्रधानः कार्य-करण-लक्षणानाम् इति?।। १ ।।

**तस्मै स होवाच। आकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रं च। ते प्रकाश्याभिवदन्ति। वयमेतद्बाणमवष्टभ्य विधारयामः।। २ ।।**

एवं पृष्टवते **तस्मै** **स**ः **ह** **उवाच**। **आकाशो** **ह** **वा** **एष** **देवो** **वायुः** **अग्निः** **आपः** **पृथिवी** इत्येतानि पञ्च महाभूतानि शरीरारम्भकाणि।

**वाङ्मनश्चक्षु**ः **श्रोत्रम्** इत्यादीनि कर्मेन्द्रिय-बुद्धीन्द्रियाणि ते कार्य-लक्षणाः करण-लक्षणाः च।

**ते** देवाः, आत्मनः माहात्म्यं **प्रकाश्य** **अभिवदन्ति** स्पर्धमाना अहंश्रेष्ठतायै।

कथं वदन्ति? **वयमेतद्** **बाणं** कार्य-करण-संघातम् **अवष्टभ्य** [10] प्रासादमिव स्तम्भादयः अविशिथिलीकृत्य **विधारयाम**ः विस्पष्टं धारयामः।

मया एव एकेन अयं संघातः ध्रियते इत्येकैकस्याभिप्रायः।। २ ।।

---

[10] स्तभि १.२७१ आ.पद प्रतिबन्धे। स्तम्भ्। स्तम्भते।

**तान्वरिष्ठः प्राण उवाच। मा मोहमापद्यथ। अहमेव एतत्**[11] **पञ्चधा आत्मानं प्रविभज्य एतद्बाणमवष्टभ्य विधारयामि इति। तेऽश्रद्दधाना बभूवुः।। ३ ।।**

**तान्** एवमभिमानवतः **वरिष्ठः** मुख्यः **प्राणः** **उवाच** उक्तवान्। **मा** मैवं **मोहमापद्यथ** अविवेकतया अभिमानं मा कुरुत। यस्माद् **अहमेव** **एत□णम्** **अवष्टभ्य** विधारयामि। **पञ्चधा** **आत्मानं** **प्रविभज्य** प्राणादि-वृत्तिभेदं स्वस्य कृत्वा **विधारयामि** इत्युक्तवति च तस्मिन् **ते** **अश्रद्दधानाः** अप्रत्ययवन्तः **बभूवुः,** कथम् एतद् एवम् इति।। ३ ।।

**सोऽभिमानाद् ऊर्ध्वं उत्क्रमत इव तस्मिन् उत्क्रामति अथ इतरे सर्वे एव उत्क्रामन्ते। तस्मिन् च प्रतिष्ठमाने सर्वे एव प्रातिष्ठन्ते। तद्यथा मक्षिका मधुकरराजानम् उत्क्रामन्तं सर्वा एव उत्क्रामन्ते। तस्मिन् च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त। एवं वाङ्मनश्चक्षुः श्रोत्रं च। ते प्रीताः प्राणं स्तुन्वन्ति।। ४ ।।**

---

[11] क्रियाविशेषणम्। प्रविभज्य इत्यनेन अन्वेति।

**सः** च प्राणः तेषामश्रद्दधानताम् आलक्ष्य **अभिमानाद्** **ऊर्ध्वम्** **उत्क्रमत** इव इदम् उत्क्रान्तवान् इव सरोषान्निरपेक्षः। **तस्मिन्** **उत्क्रामति**। यद्वृत्तं तद् दृष्टान्तेन प्रत्यक्षीकरोति। तस्मिन् उत्क्रामति सति **अथ** अनन्तरमेव **इतरे** **सर्वे** **एव** प्राणाः चक्षुरादयः **उत्क्रामन्ते** उच्चक्रमिरे[12]। **तस्मिन्** **च** प्राणे **प्रतिष्ठमाने** तूष्णीं भवति अनुत्क्रामति सति **सर्वे** **एव** **प्रातिष्ठन्ते** तूष्णीं व्यवस्थिता अभूवन्। **तत्** तत्र **यथा** लोके **मक्षिका** मधुकराः स्वराजानं **मधुकरराजानम्** **उत्क्रामन्तं** प्रति **सर्वा** **एव** **उत्क्रामन्ते** **तस्मिन्** **च** **प्रतिष्ठमाने** **सर्वा** **एव** **प्रातिष्ठन्ते** प्रतितिष्ठन्ति। यथा अयं दृष्टान्तः **एवं** **वाङ्मनश्चक्षुः** **श्रोत्रं** **च** इत्येवमादयः[13] **ते** उत्सृज्य अश्रद्दधानतां बुद्ध्वा प्राणमाहात्म्यं **प्रीताः** **प्राणं** **स्तुन्वन्ति** स्तुवन्ति।। ४ ।।

---

[12] पा.भेद - उच्चक्रमिरे इत्यस्य स्थाने उत्क्रामन्ति उच्चक्रमुः इति।
[13] पा.भेद - इत्यादयः इति आनन्दाश्रमः।

कथम्? -

**एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत्।। ५ ।।**

**एष**: प्राणः **अग्निः** सन् **तपति** ज्वलति। तथा **एषः** **सूर्यः** सन् प्रकाशते। तथा **एषः** **पर्जन्यः** सन् वर्षति। किञ्च **मघवान्** इन्द्रः सन् प्रजाः पालयति, जिघांसति असुर-रक्षांसि। **एषः** **वायुः** आवह-प्रवहादि-भेदः। किंच **एषः** **पृथिवी, रयिः**, **देवः**। सर्वस्य जगतः **सद्** मूर्तम् **असद्** अमूर्तं च। **अमृतं च यद्** देवानां स्थिति-कारणम्, किं बहुना।। ५ ।।

**अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्। ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च।।**

**६ ।।**

**अरा** **इव** **रथनाभौ** श्रद्धादि नामान्तं **सर्वं** स्थिति-काले **प्राणे** एव **प्रतिष्ठितम्**। तथा **ऋचः** **यजूंषि** **सामानि** इति त्रिविधा मन्त्राः। तत्साध्यश्च **यज्ञः**। **क्षत्रं** च सर्वस्य पालयितृ। **ब्रह्म** **च** यज्ञादि-कर्म-कर्तृत्वे अधिकृतं च एव एष प्राणः सर्वम्।। ६ ।।

किंच -

**प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे। तुभ्यं प्राण प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि।। ७ ।।**

यः **प्रजापति**: अपि सः **त्वमेव गर्भे चरसि**। पितुः मातुः च प्रतिरूपः सन् **प्रतिजायसे**।

प्रजापतित्वादेव प्रागेव सिद्धं तव मातृ-पितृत्वम्। सर्व-देह-देह्याकृतिच्छद्मना[14] एकः प्राणः सर्वात्मा

असि इत्यर्थः। **तुभ्यं** त्वदर्थं या **इमा**: मनुष्याद्याः **प्रजा**: **तु** हे **प्राण** चक्षुरादि-द्वारैः **बलिं हरन्ति**। **यः**

त्वं **प्राणै**: चक्षुरादिभिः सह **प्रतितिष्ठसि** सर्व-शरीरेषु। अतः तुभ्यं बलिं हरन्ति इति युक्तम्। भोक्ता हि

यतः त्वम्, तव एव अन्यत्सर्वं भोज्यम्।। ७ ।।

किञ्च -

**देवानामसि वह्नितमः। पितॄणां प्रथमा स्वधा। ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि।।**

**८ ।।**

[14] पा.भेद - सर्वदेहदेह्याकृतिच्छन्नः इति।

**देवानाम्** इन्द्रादीनाम् **असि** भवसि त्वं **वह्नितम**:। हविषां प्रापयितृतमः। **पितॄणां** नान्दी-मुखे श्राद्धे या पितृभ्यो दीयते **स्वधा** अन्नं सा देवप्रदानम्[15] अपेक्ष्य **प्रथमा** भवति। तस्याः अपि पितृभ्यः प्रापयिता त्वमेव इत्यर्थः। किञ्च **ऋषीणां** चक्षुरादीनां प्राणानाम् **अथर्वाङ्गिरसाम्** अङ्गिरसाम् अङ्गिरस-भूतानाम् अथर्वाणां तेषामेव "प्राणः वा अथर्वा (बृ.उप. १.३.१९)" इति श्रुतेः। **चरितं** चेष्टितं **सत्यम्** अवितथम्, देह-धारणद्युपकार-लक्षणं त्वमेव **असि**।। ८ ।।

किञ्च -

**इन्द्रस्त्वं प्राण तेजसा रुद्रोसि परिरक्षिता। त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः।। ९ ।।**

---

[15] पा.भेद - देवप्रधान इति।

**इन्द्र**: परमेश्वर: **त्वं** हे **प्राण**। **तेजसा** वीर्येण **रुद्रोसि** संहरञ्जगत्[16]। स्थितौ च **परि** समन्तात् **रक्षिता** पालयिता परिरक्षिता त्वमेव जगत: सौम्येन रूपेण। **त्वमन्तरिक्षे** अजस्रं **चरसि** उदयास्तमयाभ्याम्। **सूर्यस्त्वम्** एव च सर्वेषां **ज्योतिषां** **पति**:।। ९ ।।

**यदा त्वमभिवर्षसि अथ इमा: प्राण ते (प्राणते)। प्रजा: आनन्दरूपास्तिष्ठन्ति कामायान्नं भविष्यतीति।। १० ।।**

**यदा** पर्जन्य: भूत्वा **अभिवर्षसि** **त्वम्** **अथ** तदा अन्नं प्राप्य **इमा**: **प्रजा**: **प्राणते** प्राण-चेष्टां कुर्वन्ति इत्यर्थ:। अथवा, **प्राण** **ते** तव **इमा:** **प्रजा:** स्वात्मभूता: त्वदन्न-संवर्धिता: त्वदभिवर्षण-दर्शन-मात्रेण च **आनन्दरूपा:** सुखं प्राप्ता: इव सत्य: **तिष्ठन्ति**। **कामाय** इच्छात: **अन्नं** **भविष्यति** इति एवमभिप्राय:।। १० ।।

---

[16] पा.भेद - संहरञ्जगदिति आनन्दाश्रम:।

किंच -

**व्रात्यस्त्वं प्राणैकऋषिरत्ता विश्वस्य सत्पतिः। वयमाद्यस्य दातारः। पिता त्वं मातरिश्व नः।। ११ ।।**

प्रथमजत्वाद् अन्यस्य संस्कर्तुः अभावाद् असंस्कृतः **व्रात्यः** **त्वं** स्वभावतः एव शुद्धः इत्यभिप्रायः। हे **प्राण** **एक-ऋषिः** त्वम् आथर्वणानां प्रसिद्धः एक-ऋषि-नामाग्निः सन् **अत्ता** सर्व-हविषाम्। त्वमेव **विश्वस्य** सर्वस्य सतः विद्यमानस्य पतिः **सत्पतिः**। साधुर्वा पतिः सत्पतिः। **वयं** पुनः **आद्यस्य** तव अदनीयस्य हविषः **दातारः**। **त्वं** **पिता** **मातरिश्व** हे मातरिश्वन् **नः** अस्माकम्। अथवा, मातरिश्वनः वायोः त्वं पिता[17]। अतश्च सर्वस्य एव जगतः पितृत्वं सिद्धम्।। ११ ।।

---

[17] पा.भेद - पितेति न आनन्दाश्रमे।

किं बहुना -

**या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि। या च मनसि संतता शिवां तां कुरु मोत्क्रमीः।। १२ ।।**

**या ते** त्वदीया तनूर्वाचि प्रतिष्ठिता वक्तृत्वेन वदन-चेष्टां कुर्वती। **या श्रोत्रे**। **या च चक्षुषि**। **या च मनसि** संकल्पादि-व्यापारेण **संतता** समनुगता तनूः ताम्। **शिवां** शान्तां **कुरु**। **मोत्क्रमीः** उत्क्रमणेन अशिवां मा कार्षीः इत्यर्थः।। १२ ।।

किं बहुना -

**प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्। मातेव पुत्रान् रक्षस्व। श्रीश्च प्रज्ञां च विधेहि न इति।। १३ ।।**

अस्मिन् लोके **प्राणस्य** एव **वशे** **सर्वम्** **इदं** यत्किञ्चित् उपभोग-जातं **त्रिदिवे** तृतीयस्यां दिवि च **यत्प्रतिष्ठितं** देवाद्युपभोग-लक्षणं तस्यापि प्राण एव ईशिता रक्षिता। अतः मातेव **पुत्रान्** अस्मान् **रक्षस्व** पालयस्व। त्वन्निमित्ता हि ब्राह्म्यः क्षात्रियाश्च श्रियः ताः। त्वं **श्रीश्च** श्रियश्च **प्रज्ञां** **च** त्वत्-स्थिति-निमित्तां **विधेहि**। **नः** विधत्स्व इत्यर्थः। इति एवं सर्वात्मतया वागादिभिः प्राणैः स्तुत्या गमित-महिमा प्राणः प्रजापतिः अत्ता इत्यवधृतम्।। १३ ।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये द्वितीयः प्रश्नः)।।

## प्रश्नः ३

**अथ हैनं कौसल्यश्च आश्वलायनः पप्रच्छ। भगवन्कुत एष प्राणो जायते। कथमायात्यस्मिन् शरीरे। आत्मानं वा प्रविभज्य कथं प्रातिष्ठते। केनोत्क्रमते। कथं बाह्यमभिधत्ते। कथमध्यात्ममिति।। १ ।।**

**अथ** **ह** **एनं** **कौसल्यश्च** **आश्वलायन**ः **पप्रच्छ**। प्राणः ह्येवं प्राणैः निर्धारित-तत्वैः उपलब्ध-महिमा अपि संहतत्वात् स्याद् अस्य कार्यत्वम्। अतः पृच्छामि। हे **भगवन्** १) **कुत**ः कस्मात् कारणाद् **एष**ः यथावधृतः **प्राणो** **जायते**? २) जातश्च **कथम्** केन वृत्तिविशेषेण **आयाति** **अस्मिन्** **शरीरे**? किंनिमित्तकमस्य शरीरग्रहणमित्यर्थः। ३) प्रविष्टश्च शरीरे, **आत्मानं** **वा** **प्रविभज्य** प्रविभागं कृत्वा **कथं** केन प्रकारेण **प्रातिष्ठते** प्रतितिष्ठति? ४) **केन** वा वृत्ति-विशेषेण अस्मात् शरीराद् **उत्क्रमते** उत्क्रामति? ५) **कथं** **बाह्यम्** अधिभूतम् अधिदैवतं च **अभिधत्ते**? धारयति इति शेषः। ६) **कथमध्यात्मम्**? **इति**।। १ ।।

**तस्मै स होवाच। अतिप्रश्नान् पृच्छसि। ब्रह्मिष्ठोऽसीति तस्मात् तेऽहं ब्रवीमि।। २ ।।**

एवं पृष्टः **तस्मै** **स** **ह** **उवाच** आचार्यः। प्राण एव तावद् दुर्विज्ञेयत्वाद् विषम-प्रश्नार्हः। तस्यापि जन्मादि त्वं पृच्छसि। अतः **अतिप्रश्नान्** **पृच्छसि**। **ब्रह्मिष्ठोऽसि** **इति** अतिशयेन त्वं ब्रह्मवित्। अतः तुष्टः **अहं** **तस्मात्** **ते** तुभ्यं **ब्रवीमि** यत्पृष्टं शृणु।। २ ।।

**आत्मनः एष प्राणः जायते। यथैषा पुरुषे छायैतस्मिन् एतदाततं मनोकृतेनाऽऽयात्यस्मिन् शरीरे।। ३ ।।**

१) **आत्मनः** परस्मात् पुरुषाद् अक्षरात् सत्याद् **एष** उक्तः **प्राणः** **जायते**। कथम् इति? अत्र दृष्टान्तः **यथा** लोके **एषा** **पुरुषे** शिरःपाण्यादिलक्षणे निमित्ते **छाया** नैमित्तिकी जायते तद्वद् **एतस्मिन्** ब्रह्मणि **एतत्** प्राणाख्यं छाया-स्थानीयम् अनृतरूपं तत्वं सत्ये पुरुषे **आततम्**। समर्पितमित्येतत्। छाया इव देहे।।

२) **मनोकृतेन** मनः-संकल्पेच्छादि-निष्पन्न-कर्म-निमित्तेन इत्येतत्। वक्ष्यति हि "पुण्येन पुण्यम् (प्र.उप. ३.७)" इत्यादि। "तदेव सक्तः सह कर्मणा (बृ.उप. ४.४.६)" इति च श्रुत्यन्तरात्। **आयाति** आगच्छति **अस्मिन् शरीरे**।। ३ ।।

**यथा सम्राड् एव अधिकृतान् विनियुङ्क्ते एतान्ग्रामान् एतान्ग्रामान् अधितिष्ठस्व इति। एवमेव एष प्राण इतरान् प्राणान् पृथक्पृथगेव संनिधत्ते।। ४ ।।**

**यथा** येन प्रकारेण लोके राजा **सम्राड् एव** ग्रामादिषु **अधिकृतान् विनियुङ्क्ते**। कथम्? '**एतान्ग्रामान् एतान्ग्रामान् अधितिष्ठस्व**' **इति**। **एवमेव** यथा अयं दृष्टान्तः **एषः** मुख्य-**प्राणः इतरान् प्राणान्** चक्षुरादीन् आत्मभेदांश्च **पृथक्पृथगेव** यथा-स्थानं **संनिधत्ते** विनियुङ्क्ते।। ४ ।।

तत्र विभागः -

**पायूपस्थे अपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते। मध्ये तु समानः।**

**एष हि एतद्धुतमन्नं समं नयति। तस्मादेताः सप्तार्चिषो भवन्ति।। ५ ।।**

**पायूपस्थे** पायुश्च उपस्थश्च पायूपस्थं तस्मिन्। **अपानम्** आत्मभेदं मूत्र-पुरीषाद्यपनयनं कुर्वन् संनिधत्ते तिष्ठति। तथा **चक्षुःश्रोत्रे**। चक्षुश्च श्रोत्रं च चक्षु-श्रोत्रं तस्मिन् चक्षु-श्रोत्रे। **मुखनासिकाभ्यां** मुखं च नासिका च मुख-नासिके ताभ्यां मुख-नासिकाभ्यां च। निर्गच्छन् **प्राणः** **स्वयं** सम्राट्-स्थानीयः **प्रातिष्ठते** प्रतितिष्ठति। **मध्ये** **तु** प्राणापानयोः स्थानयोः नाभ्यां **समान**ः। अशितं पीतं च समं नयति इति समानः। **एषः** **हि** यस्माद् यद् **एतद्** **हुतं** भुक्तं पीतं च आत्माग्नौ प्रक्षिप्तम् **अन्नं** **समं** **नयति**। **तस्माद्** अशित-पीतेन्धनाद् अग्नेः औदर्याद् हृदयदेशं प्राप्ताद् **एताः** **सप्त**-संख्याकाः **अर्चिषः** दीप्तयः निर्गच्छन्त्यः **भवन्ति** शीर्षण्यः प्राण-द्वारा [18] दर्शन-श्रवणादि-लक्षण-रूपादि-विषय-प्रकाशाः इत्यभिप्रायः।। ५ ।।

---

[18] पा.भेद - शीर्षण्यप्राणद्वारा इति।

**हृदि ह्येष आत्मा। अत्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्याः द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडीसहस्राणि भवन्ति। आसु** व्यानश्चरति।। **६ ।।**

**हृदि** ह्येष पुण्डरीकाकार-मांस-पिण्ड-परिच्छिन्ने हृदयाकाशे **एषः** **आत्मा** आत्मना संयुक्तः लिङ्गात्मा। जीवात्मा इत्यर्थः[19]। **अत्र** अस्मिन् हृदये **एतद्** **एकशतं** एकोत्तर-शतं संख्यया प्रधान-**नाडीनां** भवति इति। **तासां** **शतं** **शतमेकैकस्याः** प्रधान-नाड्याः भेदाः। पुनरपि **द्वासप्ततिः** **द्वासप्ततिः** द्वे द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि। सहस्राणां द्वासप्ततिः। **प्रतिशाखा-नाडी**-**सहस्राणि** प्रति-प्रति-नाडी-शतं संख्यया प्रधान-नाडीनां सहस्राणि **भवन्ति**। **आसु** नाडीषु **व्यानः** वायुः **चरति**। व्यानः व्यापनात्। आदित्यादिव रश्मयः हृदयात् सर्वतोगामिनीभिः नाडीभिः सर्व-देहं संव्याप्य व्यानः वर्तते। संधि-स्कन्ध-मर्म-देशेषु विशेषेण प्राणापान-वृत्योः च मध्ये उद्भूत-वृत्तिः वीर्यवत्कर्मकर्ता भवति।। ६ ।।

---

[19] पा.भेद - एतद्वाक्यं नास्ति आनन्दाश्रमे।

**अथैकयोर्ध्वः उदानः पुण्येन पुण्यं लोकं नयति। पापेन पापम्। उभाभ्यामेव मनुष्यलोकम्।। ७ ।।**

**अथ** या तु तत्र एक-शतानां नाडीनां मध्ये ऊर्ध्वगा सुषुम्नाख्या नाडी तया **एकया** **ऊर्ध्वः** सन् **उदानः** वायुः आपाद-तल-मस्तक-वृत्तिः संचरन् **पुण्येन** कर्मणा शास्त्र-विहितेन **पुण्यं** **लोकं** देवादि-स्थान-लक्षणं **नयति** प्रापयति। **पापेन** तद्विपरीतेन **पापं** नरकं तिर्यग्योन्यादि-लक्षणम्। **उभाभ्यां** सम-प्रधानाभ्यां पुण्य-पापाभ्याम् **एव** **मनुष्यलोकम्**। नयति इत्यनुवर्त्तते।। ७ ।।

**आदित्यो ह वै बाह्यः प्राणः उदयत्येष ह्येनं चाक्षुषं प्राणमनृगृह्णानः। पृथिव्यां या देवता सैषा पुरुषस्य अपानमवष्टभ्य अन्तरा यदाकाशः। स समानो वायुः व्यानः।। ८ ।।**

**आदित्यो** **ह** **वै** प्रसिद्धः ह्यधिदैवतं **बाह्यः** **प्राण**ः। स **एषः** **उदयति** उद्-गच्छति। एष **ह्येनं** आध्यात्मिकं चक्षुषि भवं **चाक्षुषं** **प्राणं** प्रकाशेन **अनृगृह्णानः**। रूपोपलब्धौ चक्षुषः आलोकं कुर्वन् इत्यर्थः। तथा **पृथिव्याम्** अभिमानिनी **या** **देवता** प्रसिद्धा **सैषा** **पुरुषस्य** **अपानम्** अपानवृत्तिम् **अवष्टभ्य** आकृष्य। वशीकृत्य अधः एव अपकर्षणेन अनुग्रहं कुर्वती वर्त्तते इत्यर्थः। अन्यथा हि शरीरं गुरुत्वात् पतेत्, सावकाशे वा उद्-गच्छेत्। **यद्** एतद् **अन्तरा** मध्ये द्यावा-पृथिव्योः यः **आकाशः** तत्स्थः वायुः आकाशः उच्यते, मञ्चस्थवत्। **स** **समानः** समानम् अनुगृह्णानः वर्त्तते इत्यर्थः। समानस्य अन्तराकाशस्थत्व-सामान्यात्। सामान्येन च यो बाह्यः **वायुः** स व्याप्ति-सामान्याद् **व्यानः**। व्यानमनुगृह्णानः वर्त्तते इत्यभिप्रायः।। ८ ।।

**तेजो ह वा उदानः। तस्माद् उपशान्ततेजाः।**

**पुनर्भवमिन्द्रियैः मनसि संपद्यमानैः।। ९ ।।**

य□ह्यं **ह** **वै** प्रसिद्धं सामान्यं **तेजः** तत् शरीरे **उदान**ः उदानं वायुम् अनुगृह्णाति स्वेन प्रकाशेन इत्यभिप्रायः। यस्मात् तेजःस्वभावः बाह्य-तेजोऽनुगृहीतः उत्क्रान्ति-कर्ता **तस्माद्** यदा लौकिकः पुरुषः **उपशान्ततेजा**ः भवति। उपशान्तं स्वाभाविकं तेजो यस्य सः। तदा तं क्षीणायुषं मुमूर्षुं विद्यात्। सः **पुनर्भवं** शरीरान्तरं प्रतिपद्यते। कथम्? सह **इन्द्रियैः** **मनसि** स**ंपद्यमानै**ः प्रविशद्भिः वागादिभिः।। ९ ।।

**यच्चित्तस्तेनैषः प्राणमायाति। प्राणस्तेजसा युक्तः।**

**सहात्मना यथासंकल्पितं लोकं नयति।। १० ।।**

मरण-काले **यच्चित्त**ः भवति **तेन** **एष**ः जीवः[20] चित्तेन संकल्पेन इन्द्रियैः सह **प्राणं** मुख्य-प्राण-वृत्तिम्

**आयाति**। मरण-काले क्षीणेन्द्रिय-वृत्तिः सन्मुख्यया प्राण-वृत्त्या एव अवतिष्ठते इत्यर्थः।

तदा हि वदन्ति ज्ञातयः उच्छ्वसिति जीवति इति। स च **प्राणः** **तेजसा** उदान-वृत्त्या **युक्तः** सन् **सह**

**आत्मना** स्वामिना भोक्त्रा स एवम् उदान-वृत्या एव युक्तः प्राणः तं भोक्तारं पुण्य-पाप-कर्म-वशाद्

**यथासंकल्पितं** यथाभिप्रेतं **लोकं** **नयति** प्रापयति।। १० ।।

---

[20] पा.भेद - एषः जीवः इत्यस्य स्थाने एव इति।

**यः एवं विद्वान् प्राणं वेद न ह अस्य प्रजा हीयते। अमृतो भवति। तदेषः श्लोकः।।**

**११ ।।**

**यः** कश्चित् **एवं** **विद्वान्** यथोक्त-विशेषणैः विशिष्टम् उत्पत्त्यादिभिः **प्राणं** **वेद** जानाति, तस्य इदं फलम् ऐहिकमामुष्मिकं च उच्यते। **न** **ह** **अस्य** नैवास्य विदुषः **प्रजा** पुत्र-पौत्रादि-लक्षणा **हीयते** छिद्यते। पतिते च शरीरे प्राण-सायुज्यतया **अमृतः** अमरणधर्मा **भवति**। **तद्** एतस्मिन् अर्थे संक्षेपाभिधायकः **एषः** **श्लोकः** मन्त्रः भवति।। ११ ।।

**उत्पत्तिमायतिं स्थानं विभुत्वं चैव पञ्चधा। अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते।**

**विज्ञायामृतमश्नुत इति।। १२।।**

**उत्पत्तिम्** परमात्मनः प्राणस्य। **आयतिम्** आगमनं मनोकृतेन अस्मिन् शरीरे। **स्थानं** स्थितिं च पायूपस्थादि-स्थानेषु। **विभुत्वं च** स्वाम्यम् **एव** सम्राडिव प्राण-वृत्ति-भेदानाम् **पञ्चधा** स्थापनम्। बाह्यम् आदित्यादि-रूपेण **अध्यात्मं चैव** चक्षुराद्याकारेण अवस्थानम्। **विज्ञाय** एवं प्राणम्। **अमृतमश्नुते** इति। **विज्ञायामृतमश्नुते** इति। द्विर्वचनं प्रश्नार्थ-परिसमाप्त्यर्थम्।। १२।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये तृतीयः प्रश्नः)।।

# प्रश्नः ४

**अथ ह एनं सौर्यायणी गार्ग्यः पप्रच्छ**। प्रश्न-त्रयेण अपर-विद्या-गोचरं सर्वं परिसमाप्य संसारं व्याकृत-विषयं साध्य-साधन-लक्षणम् अनित्यम् अथ इदानीम् असाध्य-साधन-लक्षणम्[21] अप्राणम् अमनोगोचरम् अतीन्द्रिय-विषयं[22] शिवं शान्तम् अविकृतम् अक्षरं सत्यं पर-विद्या-गम्यं पुरुषाख्यं सबाह्याभ्यन्तरम् अजं वक्तव्यमिति उत्तरं प्रश्न-त्रयम् आरभ्यते।।

तत्र सुदीप्तादिव अग्नेः यस्मात् पराद् अक्षरात् सर्वे भावाः विस्फुलिङ्गाः इव जायन्ते तत्र चैवापियन्ति इत्युक्तं द्वितीये मुण्डके (मु.उप. २.१.२)। के ते सर्वे भावाः [23]अक्षराद्विभज्यन्ते? कथं वा विभक्ताः सन्तः तत्रैव अपियन्ति? किं लक्षणं वा तदक्षरमिति? एतद्विवक्षया अधुना प्रश्नान् उद्भावयति।।

---

[21] पा.भेद - साध्य-साधन-विलक्षणमिति।
[22] पा.भेद - अतीन्द्रियम् अविषयमिति।
[23] पा.भेद - विस्फुलिङ्गाः इव इत्यधिकं वा।

**अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगवन् एतस्मिन् पुरुषे कानि स्वपन्ति।**

**कानि अस्मिन् जाग्रति। कतर एषः देवः स्वप्नान् पश्यति। कस्य एतत्सुखं भवति।**

**कस्मिन् उ सर्वे संप्रतिष्ठा भवन्ति इति।। १ ।।**

**भगवन् एतस्मिन् पुरुषे** शिरः-पाण्यादिमति **कानि** करणानि **स्वपन्ति** स्वापं कुर्वन्ति, स्व-व्यापाराद् उपरमन्ते? **कानि** च **अस्मिन् जाग्रति** जागरणम् अनिद्रावस्थां स्व-व्यापारं कुर्वन्ति? **कतर**: कार्य-करण-लक्षणयोः **एषः देवः स्वप्नान् पश्यति**? स्वप्नो नाम जाग्रद्-दर्शनाद् निवृत्तस्य जाग्रद्वद् अन्तःशरीरे यद्दर्शनम्। तत् किं कार्य-लक्षणेन देवेन निर्वर्त्यते, किं वा करण-लक्षणेन केनचिद् इत्यभिप्रायः। उपरते च जाग्रत्स्वप्न-व्यापारे यत्प्रसन्नं निरायास-लक्षणम् अनाबाधं **सुखं कस्य एतत् भवति**? तस्मिन् काले जाग्रत्स्वप्न-व्यापाराद् उपरताः सन्तः क**स्मिन् उ सर्वे संप्रतिष्ठिता**: सम्यग् एकीभूताः? मधुनि रसवत् समुद्र-प्रविष्ट-नद्यादिवत् च विवेकानर्हाः प्रतिष्ठिताः **भवन्ति**। संगताः संप्रतिष्ठिताः भवन्ति इत्यर्थः।।

ननु न्यस्त-दात्रादि-करणवत् स्व-व्यापारद् उपरतानि पृथक्पृथगेव स्वात्मनि अवतिष्ठन्ते इत्येतद्युक्तं

कुतः प्राप्तिः सुषुप्त-पुरुषाणां करणानां कस्मिंश्चिद् एकीभाव-गमनाशंकायाः प्रष्टुः।

युक्ता एव तु आशंका।

यतः संहतानि करणानि स्वाम्यर्थानि परतन्त्राणि च जाग्रद्विषये तस्मात् स्वापे अपि संहतानां पारतन्त्र्येण

एव कस्मिंश्चित् संगतिः न्याय्या इति तस्माद् आशंकानुरूपः एव प्रश्नोऽयम्।

अत्र तु कार्य-करण-संघातः यस्मिंश्च प्रलीनः सुषुप्त-प्रलय-कालयोः तद्विशेषं बुभुत्सोः।

स को नु स्यादिति कस्मिन् सर्वे संप्रतिष्ठिता भवन्ति इति।। १ ।।

**तस्मै स होवाच।**

**यथा गार्ग्य मरीचयोऽर्कस्य अस्तं गच्छतः सर्वा एतस्मिंस्तेजोमण्डले एकीभवन्ति।**

**ताः पुनः पुनः उदयतः प्रचरन्त्येवं ह वै तत्सर्वं परे देवे मनसि एकीभवति।**

**तेन तर्हि एष पुरुषो न श्रृणोति। न पश्यति। न जिघ्रति। न रसयते। न स्पृशते।**

**नाभिवदते। नादत्ते। नानन्दयते। न विसृजते। नेयायते। स्वपिति इत्याचक्षते।। २ ।।**

**तस्मै** **स** **होवाच** आचार्यः। श्रृणु हे **गार्ग्य** यत्त्वया पृष्टम्।

**यथा** **मरीचयः** रश्मयः **अर्कस्य** आदित्यस्य **अस्तं** अदर्शनं **गच्छतः** **सर्वाः** अशेषतः **एतस्मिंस्तेजोमण्डले** तेजोराशि-रूपे **एकीभवन्ति**। विवेकानर्हत्वम् अविशेषतां गच्छन्ति।

**ताः** मरीचयः तस्यैव अर्कस्य **पुनः** **पुनः** **उदयतः** उद्-गच्छतः **प्रचरन्ति** विकीर्यन्ते।

यथा अयं दृष्टान्तः, **एवं** **ह** **वै** **तत्सर्वं** विषयेन्द्रियादि-जातं **परे** प्रकृष्टे **देवे** द्योतनवति **मनसि**।

चक्षुरादि-देवानां मनस्तन्त्रत्वात् परो देवः मनः। तस्मिन् स्वप्न-काले **एकीभवति**।

मण्डले मरीचिवद् अविशेषतां गच्छति। जिजागरिषोः च रश्मिवन्मण्डलान्मनसः एव प्रचरति[24]।

स्व-व्यापाराय प्रतिष्ठते। यस्मात् स्वप्नकाले श्रोत्रादीनि शब्दाद्युलब्धि-करणानि मनस्येकीभूतानि इव

करण-व्यापाराद् उपरतानि **तेन** तस्मात् **तर्हि** तस्मिन् स्वाप-काले **एष**: देवदत्तादि-लक्षणः **पुरुषो न**

**श्रृणोति, न पश्यति, न जिघ्रति, न रसयते, न स्पृशते, नाभिवदते, नादत्ते, नानन्दयते, न**

**विसृजते**, **नेयायते**। **स्वपिति इत्याचक्षते** लौकिकाः।। २ ।।

[24] पा.भेद - प्रचरन्ति इति।

**प्राणाग्नय एवैतस्मिन् पुरे जाग्रति। गार्हपत्यो ह वै एषोऽपानो व्यानोऽन्वाहार्यपचनो**

**यद्-गार्हपत्यात् प्रणीयते प्रणयनाद् आहवनीयः प्राणः।। ३ ।।**

सुप्तवत्सु श्रोत्रादिषु करणेषु **एतस्मिन् पुरे** नव-द्वारे देहे **प्राणाग्नयः** प्राणादि-पञ्च-वायवः[25] अग्नयः इव अग्नयः **जाग्रति**। अग्नि-सामान्यं ह्याह - **गार्हपत्यो ह वै एषोऽपान**ः।

कथमिति? आह - यस्माद् **गार्हपत्याद्** अग्नेः अग्नि-होत्र-काले इतरः अग्निः **आहवनीयः प्रणीयते प्रणयनात्** प्रणीयते अस्माद् इति प्रणयनः गार्हपत्यः अग्निः।

तथा सुप्तस्य अपान-वृत्तेः प्रणीयते[26] इव प्राणः मुख-नासिकाभ्यां संचरति।

अतः आहवनीय-स्थानीयः **प्राण**ः। **व्यानः** तु हृदयाद् दक्षिण-सुषिर-द्वारेण (छा.उप. ३.१३) निर्गमात्, दक्षिण-दिक्-संबन्धात्, **अन्वाहार्यपचनः** दक्षिणाग्निः।। ३ ।।

---

[25] पा.भेद - प्राणा एव पञ्चवायवः इति।
[26] पा.भेद - प्रणीत इति।

**यदुच्छ्वासनिश्वासौ एतौ आहुती। समं नयति इति स समानः।**

**मनो ह वाव यजमानः। इष्टफलमेवोदानः।**

**स एनं यजमानमहरहर्ब्रह्म गमयति।। ४ ।।**

अत्र च होता अग्निहोत्रस्य **यद्** यस्मात् **उच्छ्वासनिश्वासौ** अग्निहोत्राहुती इव नित्यं द्वित्व-सामान्यादेव

तु **एतौ** **अहुती**।

**समं** साम्येन शरीर-स्थिति-भावाय **नयति** यो वायुः, अग्नि-स्थानीयः अपि होता च आहुत्योः नेतृत्वात्।

कोऽसौ? **स** **समानः**। अतश्च विदुषः स्वापोऽपि अग्निहोत्र-हवनमेव।

तस्माद् विद्वान् न अकर्मी इत्येवं मन्तव्यः इत्यभिप्रायः।

“सर्वदा सर्वाणि भूतानि विचिन्वन्त्यपि स्वपते (शतपथ १०.५.३.१२)” इति हि वाजसनेयके।

अत्र हि जाग्रत्सु प्राणाग्निषु, उपसंहृत्य बाह्य-करणानि विषयांश्च, अग्निहोत्र-फलमिव स्वर्गं, ब्रह्म जिगमिषुः **मनो ह वाव यजमानः** जागर्त्ति यजमानवत्।

कार्य-करणेषु प्राधान्येन संव्यवहारात्, स्वर्गमिव ब्रह्म प्रति प्रस्थितत्वाद् यजमानः मनः कल्प्यते।

**इष्टफलं** यागफलम् **एव उदान**ः वायुः। उदान-निमित्तत्वाद् इष्ट-फल-प्राप्तेः।

कथम्? **स**ः उदानः **एनं** मनआख्यं **यजमानं** स्वप्न-वृत्ति-रूपादपि प्रच्याव्य **अहरहः** सुषुप्ति-काले स्वर्गमिव **ब्रह्म** अक्षरं **गमयति**। अतो याग-फल-स्थानीयः उदानः।

एवं विदुषः श्रोत्राद्युपरम-कालाद् आरभ्य यावत् सुप्तोत्थितः भवति तावत् सर्व-याग-फलानुभवः एव, न अविदुषाम् इव अनर्थाय, इति विद्वत्ता स्तूयते। न हि विदुषः एव श्रोत्रादीनि स्वपन्ते प्राणाग्नयः वा जाग्रति, जाग्रत्स्वप्नयोः मनः स्वातन्त्र्यमनुभवद् अहरहः सुषुप्तं वा प्रतिपद्यते। समानं हि सर्व-प्राणिनां पर्यायेण जाग्रत्-स्वप्न-सुषुप्ति-गमनम्। अतो विद्वत्ता-स्तुतिरेव अयमुपपद्यते।। ४।।

यत्पृष्टं कतर एष देवः स्वप्नान् पश्यति इति तदाह -

**अत्रैष देवः स्वप्ने महिमानमनुभवति। यद्दृष्टं दृष्टमनुपश्यति। श्रुतं श्रुतमेवार्थमनुश्रुणोति।**

**देशदिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति।**

**दृष्टं चादृष्टं च श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति।**

**सर्वः पश्यति।। ५ ।।**

**अत्र** उपरतेषु श्रोत्रादिषु देह-रक्षायै जाग्रत्सु प्राणादि-वायुषु प्राक् सुषुप्तिप्रतिपत्तेः एतस्मिन् अन्तराले

**एषः** **देवः** अर्क-रश्मिवत् स्वात्मनि संहत-श्रोत्रादि-करणः **स्वप्ने** **महिमानं** विभूतिं विषय-विषयि-

लक्षणम् अनेकात्मभाव-गमनम् **अनुभवति** प्रतिपद्यते।

**आक्षेपः**

ननु महिमानुभवने करणं मनः अनुभवितुः।

तत्कथं स्वातन्त्र्येण अनुभवति इति उच्यते? स्वतन्त्रो हि क्षेत्रज्ञः।।

**समाधानम्**

नैष दोषः। क्षेत्रज्ञस्य स्वातन्त्र्यस्य मन-उपाधि-कृतत्वात्।

न हि क्षेत्रज्ञः परमार्थतः स्वतः स्वपिति जागर्त्ति वा। मन-उपाधि-कृतमेव तस्य जागरणं स्वप्नश्च इत्युक्तं वाजसनेयके - "सधीः स्वप्नो भूत्वा ध्यायतीव लेलायतीव (बृ.उप. ४.३.७)" इत्यादि। तस्मान्मनसो विभूत्यनुभवे स्वातन्त्र्य-वचनं न्याय्यमेव।।

मन-उपाधि-सहितत्वे स्वप्न-काले क्षेत्रज्ञस्य स्वयं-ज्योतिष्ट्वं बाध्येत इति केचित्।

तन्न। श्रुत्यर्थापरिज्ञान-कृता भ्रान्तिः तेषाम्। यस्मात् स्वयं-ज्योतिष्ट्वादि-व्यवहारः अपि आमोक्षान्तः सर्वः[27] अविद्या-विषयः एव मन-आद्युपाधि-जनितः। "यत्र वा अन्यदिव स्यात् तत्र अन्यः अन्यत्पश्येत् (बृ.उप. ४.३.३१)" "मात्राऽसंसर्गस्त्वस्य भवति (माध्यन्दिन बृ.उप. ४.३.१५)" "यत्रत्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् (बृ.उप. ४.५.१५)" इत्यादि-श्रुतिभ्यः।

अतो मन्द-ब्रह्म-विदामेव इयमाशंका, न तु एकात्मविदाम्।।

---

[27] पा.भेद - अपि इत्यधिकं वा।

**आक्षेपः**

ननु एवं सति "अत्र अयं पुरुषः स्वयंज्योतिः (बृ.उप. ४.३.९,१४)" इति विशेषणमनर्थकं भवति।।

**समाधानम्**

अत्र उच्यते। अत्यल्पमिदम् उच्यते। "यः एषः अन्तर्हृदय आकाशस्तस्मिन् शेते (बृ.उप. २.१.१७)"

इत्यन्तर्हृदय-परिच्छेदे[28] सुतरां स्वयं-ज्योतिष्ट्वं बाध्येत।।

**आक्षेपः**

सत्यमेवम् अयं दोषः यद्यपि स्यात्, स्वप्ने केवलतया स्वयं-ज्योतिष्ट्वेन अर्धं तावत् अपनीतं

भारस्य इति चेत्।।

**समाधानम्**

न। तत्रापि "पुरीतति नाडीषु शेते (बृ.उप. २.१.१९)" इति श्रुतेः, पुरीतति नाडी-संबन्धात्[29]। तत्रापि[30]

पुरुषस्य स्वयं-ज्योतिष्ट्वेन अर्ध-भारापनयाभिप्रायः मृषैव।।

**आक्षेपः**

कथं तर्हि "अत्रायं पुरुषः स्वयंज्योतिः (बृ.उप. ४.३.९,१४)" इति? अन्य-शाखात्वाद् अनपेक्षा सा

श्रुतिः इति चेत्।।

---

[28] पा.भेद - परिच्छेदकरणे इति।

[29] पा.भेद - पुरीतन्नाडीसंबन्धादिति।

[30] पा.भेद - अत्रापीति।

**समाधानम्**

न। अर्थैकत्वस्य इष्टत्वात्। एको ह्यात्मा सर्व-वेदान्तानामर्थः विजिज्ञापयिषितः बुभुत्सितश्च।

तस्माद् युक्ता स्वप्ने आत्मनः स्वयं-ज्योतिष्ट्वोपपत्तिः वक्तुम्। श्रुतेः यथार्थ-तत्व-प्रकाशकत्वात्।

एवं तर्हि श्रृणु श्रुत्यर्थम्, हित्वा सर्वाभिमानम्[31]।

न तु[32] अभिमानेन वर्ष-शतेनापि श्रुत्यर्थः ज्ञातुं शक्यते सर्वैः पण्डितं-मन्यैः।।

यथा हृदयाकाशे, पुरीतति नाडीषु च स्वपतः तत्संबन्धाभावात् ततो विविच्य दर्शयितुं शक्यते इति आत्मनः स्वयं-ज्योतिष्ट्वं न बाध्यते। एवं मनसि अविद्या-काम-कर्मनिमित्तोद्भूत-वासनावति कर्म-निमित्त-वासनाः[33] अविद्यया अन्यद् वस्त्वन्तरमिव पश्यतः, सर्व-कार्य-करणेभ्यः प्रविविक्तस्य द्रष्टुः वासनाभ्यः दृश्य-रूपाभ्यः अन्यत्वेन स्वयं-ज्योतिष्ट्वं सुदर्पितेनापि तार्किकेण न[34] वारयितुं शक्यते।

तस्मात् साधु उक्तं मनसि प्रलीनेषु करणेषु, अप्रलीने च मनसि, मनोमयः स्वप्नान् पश्यति इति।।

---

[31] पा.भेद - सर्वम् अभिमानम् इति।
[32] पा.भेद - हि इति।
[33] पा.भेद - कर्मनिमित्ता वासनाः इति।
[34] पा.भेद - केन इति।

कथं महिमानम् अनुभवति इति? उच्यते। **यद्** मित्रं पुत्रादि वा पूर्वं **दृष्टं** तद्वासना-वासितः पुत्र-मित्रादि-वासना-समुद्भूतं पुत्रं मित्रम् इव वा अविद्यया पश्यति इत्येवं मन्यते।

तथा **श्रुतमर्थं** तद्वासनया **अनुश्रुणोति** इव। **देशदिगन्तरैश्च** देशान्तरैः दिगन्तरैः च **प्रत्यनुभूतं** **पुनः** **पुनः** तत् **प्रत्यनुभवति** इव अविद्यया।

तथा **दृष्टं** **च** अस्मिन् जन्मनि **अदृष्टं** **च** जन्मान्तर-दृष्टम् इत्यर्थः। अत्यन्तादृष्टे वासनानुपपत्तेः।

एवं **श्रुतं** **च** **अश्रुतं** **च** **अनुभूतं** **च** अस्मिन् जन्मनि केवलेन मनसा **अननुभूतं** **च**। मनसैव जन्मान्तरे अनुभूतम् इत्यर्थः।

**सत्** **च** परमार्थोदकादि। **असत्** **च** मरीच्युदकादि। किं बहुना। उक्तानुक्तं **सर्वं** **पश्यति**। **सर्वः** **पश्यति** सर्वमनोवासनोपाधिः सन्। एवं सर्वकरणात्मा मनोदेवः स्वप्नान् पश्यति।। ५ ।।

**स यदा तेजसा अभिभूतः भवति। अत्रैष देवः स्वप्नान् न पश्यति। अथ तदैतस्मिन्**

**शरीरे एतत्सुखं भवति।। ६ ।।**

**स**: **यदा** मनोरूपः देवः यस्मिन् काले सौरेण पित्ताख्येन **तेजसा** नाडी-शयेन सर्वतः **अभिभूत**: **भवति** तिरस्कृत-वासना-द्वारः भवति। तदा सह करणैः मनसः रश्मयः हृद्युपसंहृताः भवन्ति।

यदा मनः दार्वग्निवद् अविशेष-विज्ञान-रूपेण कृत्स्नं शरीरं व्याप्य अवतिष्ठते तदा सुषुप्तो भवति।

**अत्र** एतस्मिन् काले **एष** मन-आख्यः **देव**: **स्वप्नान्** **न** **पश्यति**, दर्शन-द्वारस्य निरुद्धत्वात् तेजसा।

**अथ** **तदा** **एतस्मिन्** **शरीरे** **एतत्सुखं** **भवति** यद्विज्ञानं निराबाधम् अविशेषेण शरीर-व्यापकं प्रसन्नं भवति इत्यर्थः।। ६ ।।

एतस्मिन् काले अविद्या-काम-कर्म-निबन्धनानि कार्य-करणानि शान्तानि भवन्ति।

तेषु शान्तेषु आत्मस्वरूपमुपाधिभिः अन्यथा विभाव्यमानम् अद्वयमेकं शिवं शान्तं भवति

इत्येतामेव अवस्थां पृथिव्याद्यविद्याकृत-मात्रानुप्रवेशेन दर्शयितुं दृष्टान्तमाह -

**स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठन्ते।**

**एवं ह वै तत्सर्वं परे आत्मनि संप्रतिष्ठते।। ७ ।।**

**स** दृष्टान्तः **यथा** येन प्रकारेण **सोम्य** प्रिय-दर्शन **वयांसि** पक्षिणः वासार्थं वृक्षं **वासोवृक्षं** प्रति **संप्रतिष्ठन्ते** गच्छन्ति।

**एवं** यथा दृष्टान्तः **ह** **वै** **तद्** वक्ष्यमाणं **सर्वं** **परे** **आत्मनि** अक्षरे **संप्रतिष्ठते**।। ७ ।।

किं तत्सर्वम् -

**पृथिवी च पृथिवीमात्रा च, आपश्च आपोमात्रा च, तेजश्च तेजोमात्रा च,**

**वायुश्च वायुमात्रा च, आकाशश्च आकाशमात्रा च, चक्षुश्च द्रष्टव्यं च,**

**श्रोत्रं च श्रोतव्यं च, घ्राणं च घ्रातव्यं च, रसश्च रसयितव्यं च, त्वक् च**

**स्पर्शयितव्यं च, वाक् च वक्तव्यं च, हस्तौ च आदातव्यं च, उपस्थश्च**

**आनन्दयितव्यं च, पायुश्च विसर्जयितव्यं च, पादौ च गन्तव्यं च, मनश्च मन्तव्यं च,**

**बुद्धिश्च बोद्धव्यं च, अहंकारश्च अहंकर्तव्यं च, चित्तं च चेतयितव्यं च,**

**तेजश्च विद्योतयितव्यं च, प्राणश्च विधारयितव्यं च।। ८ ।।**

**पृथिवी** **च** स्थूला पञ्च-गुणाः तत्कारणा च **पृथिवीमात्रा** **च** गन्ध-तन्मात्रा, तथा **आपश्च** **आपोमात्रा**:

**च**। **तेजश्च** **तेजोमात्रा** **च**। **वायुश्च** **वायुमात्रा** **च**। **आकाशश्च** **आकाशमात्रा** **च**।

स्थूलानि च सूक्ष्माणि च भूतानि इत्यर्थः। तथा **चक्षुश्च** इन्द्रियं रूपं च **द्रष्टव्यं** **च**।

**श्रोत्रं च श्रोतव्यं च**। **घ्राणं च घ्रातव्यं च**। **रसश्च रसयितव्यं च**। **त्वक् च स्पर्शयितव्यं च**।

**वाक् च वक्तव्यं च**। **हस्तौ च आदातव्यं च**। **उपस्थश्च आनन्दयितव्यं च**।

**पायुश्च विसर्जयितव्यं च**। **पादौ च गन्तव्यं च**। बुद्धीन्द्रियाणि कर्मेन्द्रियाणि तथा च उक्तानि[35]।

**मनश्च** पूर्वोक्तम्। **मन्तव्यं च** तद्विषयः। **बुद्धिश्च** निश्चयात्मिका। **बोद्धव्यं च** तद्विषयः।

**अहंकारश्च** अभिमान-लक्षणम् अन्तःकरणम्। **अहंकर्तव्यं च** तद्विषयः। चित्तं च चेतनावद् अन्तःकरणम्। **चेतयितव्यं च** तद्विषयः।

**तेजश्च** त्वगिन्द्रिय-व्यतिरेकेण प्रकाश-विशिष्टा या त्वक् तया निर्भास्यः विषयः **विद्योतयितव्यम्**।

**प्राणश्च** सूत्रं यदाचक्षते तेन **विधारयितव्यं** संग्रथनीयं सर्वं हि कार्य-करण-जातं पारार्थ्येन संहतं नाम-रूपात्मकम् एतावदेव।। ८ ।।

---

[35] पा.भेद - तदर्थाः च उक्ताः इति।

अतः परं यदात्मरूपं जल-सूर्यकादिवद् भोक्तृत्व-कर्तृत्वेन इहानुप्रविष्टम् -

**एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः स परे अक्षरे आत्मनि संप्रतिष्ठते।। ९ ।।**

**एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा** विज्ञानं विज्ञायते अनेन इति, करण-भूतं बुद्ध्यादि। इदं तु विजानाति इति विज्ञानम्, कर्तृ-कारक-रूपं तदात्मा तत्स्वभावः। विज्ञातृ-स्वभावः इत्यर्थः। **पुरुष**ः कार्य-करण-संघातोक्तोपाधि-पूर्णत्वात्[36] पुरुषः।

**स** च जल-सूर्यकादि-प्रतिबिम्बस्य सूर्यादि-प्रवेशवत् जगदाधारशेषे[37] **परे अक्षरे आत्मनि संप्रतिष्ठते**।। ९ ।।

[36] पा.भेद - पूरणादिति।
[37] पा.भेद - जलाद्याधारशोषे इति।

तदेकत्वविद: फलमाह -

**परमेव अक्षरं प्रतिपद्यते स यो ह वै तदच्छायम् अशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य। स सर्वज्ञ: सर्व: भवति। तदेष श्लोक:।। १० ।।**

**परमेव** **अक्षरं** वक्ष्यमाण-विशेषणं **प्रतिपद्यते** इति। एतदुच्यते। **स**: **यो** **ह** **वै** **तत्** सर्वैषणा-विनिर्मुक्त: **अच्छायम्** तमोवर्जितम्। **अशरीरं** नाम-रूप-सर्वोपाधि-शरीर-वर्जितम्। **अलोहितं** लोहितादि-सर्व-गुण-वर्जितम्। यत: एवम् अत: **शुभ्रं** शुद्धम् सर्व-विशेषण-रहितत्वात्। **अक्षरं** सत्यं पुरुषाख्यम्। अप्राणम् अमनोगोचरं शिवं शान्तं सबाह्याभ्यन्तरमजं **वेदयते** विजानाति। **यस्तु** सर्वत्यागी **सोम्य** **स** **सर्वज्ञ**: न तेन अविदितं किंचित् संभवति। पूर्वमविद्यया असर्वज्ञ: आसीत्। पुन: विद्यया अविद्यापनये **सर्व**: **भवति** तदा। **तद्** तस्मिन् अर्थे **एष**: **श्लोक**: मन्त्र: भवति उक्तार्थ-संग्राहक:।। १० ।।

**विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठन्ति यत्र। तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेव आविवेश इति।। ११ ।।**

**विज्ञानात्मा** **सह** **देवैश्च** अग्न्यादिभिः **प्राणा**ः चक्षुरादयः **भूतानि** पृथिव्यादीनि **संप्रतिष्ठन्ति** प्रविशन्ति **यत्र** यस्मिन् अक्षरे **तदक्षरं** **वेदयते** **यस्तु** **सोम्य** प्रिय-दर्शन **स** **सर्वज्ञ**ः **सर्वमेव** **आविवेश** आविशति इत्यर्थः।। ११ ।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये चतुर्थः प्रश्नः)।।

## प्रश्नः ५

**अथ हैनं शैब्यः सत्यकामः पप्रच्छ। स यो ह वै तद् भगवन् मनुष्येषु प्रायणान्तम् ओंकारमभिध्यायीत। कतमं वाव स तेन लोकं जयति इति। तस्मै स होवाच।। १ ।।**

**अथ** **हैनं** **शैब्यः** **सत्यकामः** **पप्रच्छ**। अथ इदानीं परापर-ब्रह्म-प्राप्ति-साधनत्वेन ओंकारस्य उपासन-विधित्सया प्रश्नः आरभ्यते - **स** **य**ः कश्चिद् **ह** **वै** **भगवन्** **मनुष्येषु** मनुष्याणां मध्ये **तद्** अद्भुतमिव **प्रायणान्तं** मरणान्तम्। यावज्जीवम् इत्येतद्। ओंका**रमभिध्यायीत** आभिमुख्येन चिन्तयेद् बाह्य-विषयेभ्यः उपसंहृत-करणः समाहित-चित्तः भक्त्या आवेशित-ब्रह्म-भावे ओंकारे। आत्मप्रत्यय-संतानाविच्छेदः भिन्न-जातीय-प्रत्ययान्तराखिलीकृतः निर्वातस्थ-दीप-शिखा-समः अभिध्यान-शब्दार्थः। सत्य-ब्रह्मचर्याहिंसाऽपरिग्रह-त्याग-संन्यास-शौच-संतोषामायावित्वाद्यनेक-यम-नियमानुगृहीतः स एवं यावज्जीव-व्रत-धारणः। **कतमं** **वाव**। अनेके हि ज्ञान-कर्मभिः जेतव्याः लोकाः तिष्ठन्ति। तेषु **तेन** ओंकाराभिध्यानेन कतमं **स** **लोकं** **जयति** **इति** पृष्टवते **तस्मै** **स** **होवाच** पिप्पलादः।। १ ।।

**एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः। तस्माद् विद्वान् एतेन एव आयतनेन एकतरमन्वेति।। २ ।।**

**एतद् वै सत्यकाम**। एतद् ब्रह्म वै **परं च अपरं च ब्रह्म** परं सत्यमक्षरं पुरुषाख्यम्, अपरं च प्रणाख्यं प्रथमजं **यत्** तद् **ओंकारः** एव ओंकारात्मकम् ओंकार-प्रतीकत्वात्। परं हि ब्रह्म शब्दाद्युपलक्षणानर्हं सर्व-धर्म-विशेष-वर्जितम्। अतः न शक्यम् अतीन्द्रिय-गोचरत्वात् केवलेन मनसा अवगाहितुम्। ओंकारे तु विष्ण्वादि-प्रतिमा-स्थानीये भक्त्यावेशित-ब्रह्म-भावे ध्यायिनां तत्प्रसीदति इत्यवगम्यते शास्त्र-प्रामाण्यात्। तथा अपरं च ब्रह्म **तस्माद्** परं च अपरं च ब्रह्म यदोंकारः इत्युपचर्यते। तस्मादेवं **विद्वान् एतेन एव** [38]आत्मप्राप्ति-साधनेन एव ओंकाराभिध्यानेन **एकतरम्** परमपरं वा ब्रह्म **अन्वेति** अनुगच्छति नेदिष्ठं हि आलम्बनमोंकारः ब्रह्मणः।। २ ।।

---

[38] पा.भेद - आयतनेन इत्यधिकं क्वचित् अत्र। आयतनेन आलम्बनेन इति वा।

स: यदि अपि ओंकारस्य सकल-मात्रा-विभागज्ञः न भवति तथा अपि ओंकाराभिध्यान-प्रभावाद् विशिष्टामेव गतिं गच्छति एतद् एकदेश-ज्ञान-वैगुण्यतया ओंकार-शरणः कर्म-ज्ञानोभय-भ्रष्टः न दुर्गतिं गच्छति। किं तर्हि -

**स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते।**

**तमृचो मनुष्यलोकमुपनयन्ते।**

**स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवति।। ३ ।।**

यद्यपि एवम् ओंकारमेव एक-मात्रा-विभागज्ञः एव केवलः **अभिध्यायीत** **एकमात्रम्** सदा ध्यायीत **स** **तेनैव** एक-मात्रा-विशिष्टोंकाराभिध्यानेनैव **संवेदितः** संबोधितः **तूर्णम्** क्षिप्रम् **एव** **जगत्याम्** पृथिव्याम् **अभिसंपद्यते**। किम्? **मनुष्यलोकम्**। अनेकानि हि जन्मानि जगत्यां संभवन्ति। तत्र **तं** साधकं जगत्यां मनुष्यलोकमेव **ऋचो** **उपनयन्ते** उपनिगमयन्ति ऋचः। ऋग्वेद-रूपा हि ओंकारस्य

प्रथमैकमात्राऽभिध्याता। तेन। **स** **तत्र** मनुष्य-जन्मनि द्विजाग्र्यः सन् **तपसा** **ब्रह्मचर्येण** **श्रद्धया** च **संपन्नो** **महिमानं** विभूतिम् **अनुभवति**। न वीत-श्रद्धः यथेष्ट-चेष्टः भवति। योग-भ्रष्टः कदाचिदपि न दुर्गतिं गच्छति।। ३ ।।

**अथ यदि द्विमात्रेण मनसि संपद्यते। सः अन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकम्। स सोमलोके विभूतिमनुभूय पुनरावर्त्तते।। ४।।**

**अथ** पुनः **यदि** द्विमात्रा-विभागज्ञः **द्विमात्रेण** विशिष्टम् ओंकारम् अभिध्यायीत स्वप्नात्मके **मनसि** मननीये यजुर्मये सोम-दैवत्ये **संपद्यते** एकाग्रतया आत्मभावं गच्छति। **सः** एवं संपन्नः, मृतः **अन्तरिक्षम्** अन्तरिक्षाधारं द्वितीय-मात्रा-रूपं द्वितीय-मात्रा-रूपैः एव **यजुर्भिः** **उन्नीयते** सोमलोकम्। सौम्यं जन्म प्रापयन्ति तं यजूंषि इत्यर्थः। **स** तत्र **विभूतिमनुभूय** **सोमलोके**, मनुष्यलोकं प्रति **पुनरावर्त्तते**।। ४ ।।

**यः पुनः एतं त्रिमात्रेण ओमित्येतेन एव अक्षरेण परं पुरुषम् अभिध्यायीत। स तेजसि सूर्ये संपन्नः। यथा पादोदरः त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकम्। स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते। तदेतौ श्लोकौ भवतः।। ५ ।।**

**यः पुनः एतम्** ओंकारं **त्रिमात्रेण** त्रिमात्रा-विषय-विज्ञान-विशिष्टेन **ओमित्येतेन एव अक्षरेण परं** सूर्यान्तर्गतं **पुरुषम्** प्रतीकेन[39] **अभिध्यायीत।** तेन अभिध्यानेन। प्रतीकत्वेन हि आलम्बनत्वं प्रकृतमोंकारस्य। "परं चापरं च ब्रह्म (प्र.उप. ५.२)" इत्यभेदश्रुतेः, ओंकारमिति च द्वितीया अनेकशः श्रुता बाध्येत अन्यथा। यद्यपि तृतीयाभिधानत्वेन करणत्वमुपपद्यते तथापि प्रकृतानुरोधात् त्रिमात्रं परं पुरुषमिति द्वितीया एव परिणेया, "त्यजेद् एकं कुलस्यार्थे (महा.भा. उ.पर्व ३७.१७)" इति न्यायेन।

[39] पा.भेद - प्रतीकत्वेन इति।

**सः** तृतीय-मात्रा-रूपः[40] **तेजसि** **सूर्ये** **संपन्नः** भवति ध्यायमानः मृतः अपि सूर्यात् सोमलोकादिवद्[41] न पुनरावर्त्तते किन्तु सूर्ये संपन्नमात्र एव। **यथा** **पादोदरः** सर्पः **त्वचा** **विनिर्मुच्यते** जीर्णत्वग्-विनिर्मुक्तः स पुनर्नवो भवति। **एवं** **ह** वा एषः यथा दृष्टान्तः **सः** **पाप्मना** सर्प-त्वक्-स्थानीयेन अशुद्धि-रूपेण **विनिर्मुक्तः** सः[42] **सामभिः** **तृतीयमात्रारूपैः** ऊर्ध्वम् **उन्नीयते** **ब्रह्मलोकं** हिरण्यगर्भस्य ब्रह्मणः लोकं सत्याख्यम्। **सः** हिरण्यगर्भः सर्वेषां संसारिणां जीवानाम् आत्मभूतः।

सः हि अन्तरात्मा लिङ्ग-रूपेण सर्व-भूतानाम्। तस्मिन् हि लिङ्गात्मनि संहताः सर्वे जीवाः। तस्मात् सः जीव-घनः। सः विद्वान् त्रिमात्रोंकाराभिज्ञः **एतस्माज्जीवघनात्** हिरण्यगर्भात् **परात्परं** परमात्माख्यं **पुरुषमीक्षते** **पुरिशयं** सर्व-शरीरानुप्रविष्टं पश्यति ध्यायमानः।

**तद्** एतस्मिन् यथोक्तार्थ-प्रकाशकौ **श्लोकौ**[43] मन्त्रौ **भवत**ः।। ५ ।।

---

[40] पा.भेद - तृतीय-मात्रा-रूपे इति।
[41] पा.भेद - सोमलोकादिव इति।
[42] पा.भेद - सः इति नास्ति आनन्दाश्रमे।
[43] पा.भेद - नास्त्येतद् आनन्दाश्रमे।

**तिस्रः मात्रा मृत्युमत्यः प्रयुक्ताः अन्योन्यसक्ता अनविप्रयुक्ताः।**

**क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः।। ६ ।।**

**तिस्रः** त्रिसंख्याका अकोरोकार-मकाराख्या ओंकारस्य **मात्राः**। **मृत्युमत्यः** मृत्युः यासां विद्यते ता मृत्युमत्यः। मृत्यु-गोचराद् अनतिक्रान्ताः। मृत्युगोचराः एव इत्यर्थः। ताः आत्मनः ध्यान-क्रियासु **प्रयुक्ताः**। किंच **अन्योन्यसक्ता**ः इतरेतर-संबद्धाः। **अनविप्रयुक्ताः** विशेषेण एकैक-विषये एव प्रयुक्ताः विप्रयुक्ताः। न तथा विप्रयुक्ताः अविप्रयुक्ताः। नाविप्रयुक्ताः अनविप्रयुक्ताः। किं तर्हि? विशेषेण एकस्मिन्[44] (प्रयुक्ताः एव) ध्यान-काले तिसृषु **क्रियासु** **बाह्याभ्यन्तर-मध्यमासु** जाग्रत्-स्वप्न-सुषुप्त-स्थान-पुरुषाभिध्यान-लक्षणासु योग-क्रियासु। **सम्यक्** **प्रयुक्तासु** सम्यक् ध्यान-काले प्रयोजितासु। **न** **कम्पते** न चलति। **ज्ञ**ः योगी। यथोक्त-विभागज्ञः ओंकारस्य इत्यर्थः। न तस्य एवंविदः चलनमुपपद्यते।

[44] पा.भेद - एकैकस्मिन् इति।

यस्माद् जाग्रत्-स्वप्न-सुषुप्त-पुरुषाः सह स्थानैः मात्रा-त्रय-रूपेण ओंकारात्मरूपेण दृष्टाः स ह्येवं विद्वान् सर्वात्मभूतः ओंकारमयः कुतो वा चलेत्, कस्मिन् वा।। ६ ।।

सर्वार्थसङ्ग्रहार्थः द्वितीयः मन्त्रः -

**ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते। तमोंरेण एव आयतनेन अन्वेति। विद्वान् यत्तच्छन्तमजरममृतमभयं परं चेति।। ७ ।।**

**ऋग्भिरेतं** लोकं मनुष्योपलक्षितम्। **यजुर्भिरन्तरिक्षं** सोमाधिष्ठितम्। **सामभिर्यत्तद्** ब्रह्मलोकम् इति तृतीयम्। **कवयो** मेधाविनः विद्यावन्तः एव, नाविद्वांसः, **वेदयन्ते। तं** त्रिविधं लोकम् **ओंकारेण** साधनेन अपर-ब्रह्म-लक्षणम् **अन्वेति** अनुगच्छति **विद्वान्**। तेन **एव** ओंकारेण **यत् तत्** परं ब्रह्माक्षरं सत्यं पुरुषाख्यं **शान्तं** विमुक्तं जाग्रत्-स्वप्न-सुषुप्त्यादि-विशेष-सर्व-प्रपञ्च-विवर्जितम्। अत एव **अजरं**

जरा-वर्जितम्। **अमृतं** मृत्यु-वर्जितम्। अत एव यस्माद् जरा-विक्रियादि-रहितम्। अतः **अभयम्।** यस्माद् एव अभयं तस्मात् **परं** निरतिशयम्। तदपि ओंकारेण **आयतनेन** गमन-साधनेन अन्वेतीत्यर्थः। इति-शब्दः वाक्य-परिसमाप्त्यर्थः।। ७ ।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये पञ्चमः प्रश्नः)।।

# प्रश्नः ६

अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। समस्तं जगत् कार्य-करण-लक्षणं[45] सह विज्ञानात्मना परस्मिन् अक्षरे सुषुप्ति-काले संप्रतिष्ठते इत्युक्तम्। सामर्थ्यात् प्रलये अपि तस्मिन् एवाक्षरे संप्रतिष्ठते जगत्, तत एव उत्पद्यते इति च[46] सिद्धम् भवति। न हि अकारणे कार्यस्य संप्रतिष्ठानमुपपद्यते। उक्तं च "आत्मनः एषः प्राणो जायते (प्र.उप. ३.३)" इति। जगतश्च यन्मूलं तत्परिज्ञानात् परं श्रेयः इति सर्वोपनिषदां निश्चितः अर्थः। अनन्तरं चोक्तं "स सर्वज्ञः सर्वः भवति (प्र.उप. ३.३)" इति। वक्तव्यं च क्व तर्हि तदक्षरं सत्यं पुरुषाख्यं विज्ञेयमिति। तदर्थोऽयं प्रश्नः आरभ्यते। वृत्तान्वाख्यानं च विज्ञानस्य दुर्लभत्व-ख्यापनेन तल्लब्ध्यर्थं मुमुक्षूणां यत्न-विशेषोत्पादनार्थम् -

---

45 पा.भेद - कार्यकारणलक्षणमिति।

46 पा.भेद - चकारः नास्त्यानन्दाश्रमे।

**अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। भगवन् हिरण्यनाभः कौसल्यः राजपुत्रः मामुपेत्य**

**एतं प्रश्नम् अपृच्छत - षोडशकलं भारद्वाज पुरुषं वेत्थ?**

**तमहं कुमारमब्रुवम्[47] - नाहमिमं वेद। यद्यहम् इमम् अवेदिषं कथं ते नावक्ष्यमिति।**

**समूलो वा एष परिशुष्यति योऽनृतमभिवदति। तस्मान्नार्हाम्यनृतं वक्तुम्।**

**स तूष्णीं रथमारुह्य प्रवव्राज। तं त्वा पृच्छामि क्वासौ पुरुष इति।। १ ।।**

हे **भगवन्** **हिरण्यनाभः** नामतः कोसलायां भवः **कौसल्यः** **राजपुत्रः** जातितः क्षत्रियः **मामुपेत्य**

उपगम्य **एतम्** उच्यमानं **प्रश्नम्** **अपृच्छत** **षोडशकलं** षोडश-संख्याकाः कलाः अवयवाः इव

आत्मनि अविद्याध्यारोपित-रूपाः यस्मिन् पुरुषे सोऽयं षोडशकलः तं षोडशकलम्।

हे **भारद्वाज** **पुरुषं** **वेत्थ** विजानासि? **तमहं** राजपुत्रं **कुमारम्** पृष्टवन्तम् **अब्रुवं**[48] अब्रवम् उक्तवानस्मि

- **नाहमिमं** **वेद** यं त्वं पृच्छसि इति।

---

47 पा.भेद - अब्रवमिति।

एवमुक्तवत्यपि मयि अज्ञानमसम्भावयन्तं तम् अज्ञाने कारणम् अवादिषम्।

**यदि** कथंचिद् **अहम्** **इमं** त्वया पृष्टं पुरुषम् **अवेदिषं** विदितवानस्मि **कथम्** अत्यन्त-शिष्य-गुणवते अर्थिने **ते** तुभ्यं **नावक्ष्यं** नोक्तवानस्मि। न ब्रूयाम् इत्यर्थः। भूयोऽपि अप्रत्ययम् इव[49] आलक्ष्य प्रत्याययितुम् अब्रुवम्। **समूलः** सह मूलेन **वा** **एषः** अन्यथा सन्तमात्मानमन्यथा कुर्वन् **अनृतम्** अयथाभूतार्थम् **अभिवदति** **यः** सः **परिशुष्यति** शोषमुपैति, इहलोक-परलोकाभ्यां विच्छिद्यते, विनश्यति। यतः एवं जाने **तस्माद्** **नार्हामि** अहम् **अनृतं** **वक्तुम्** मूढवत्। **सः** राजपुत्रः एवं प्रत्यायितः **तूष्णीं** व्रीडितः **रथमारुह्य** **प्रवव्राज** प्रगतवान् यथाऽऽगतमेव। अतो न्यायतः उपसन्नाय योग्याय जानता विद्या वक्तव्या एव, अनृतं च न वक्तव्यं सर्वासु अपि अवस्थासु इत्येतत् सिद्धं भवति।

**तं** पुरुषं **त्वा** त्वां **पृच्छामि** मम हृदि विज्ञेयत्वेन शल्यमिव मे हृदि स्थितं **क्वासौ** वर्त्तते विज्ञेयः **पुरुषः** **इति**।। १ ।।

---

48 पा.भेद - अब्रवमिति।

49 पा.भेद - एव इति।

**तस्मै स होवाच इहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन् एताः षोडश कलाः प्रभवन्ति इति।। २ ।।**

**तस्मै स होवाच**। **इहैव अन्तःशरीरे** हृदय-पुण्डरीकाकाश-मध्ये हे **सोम्य स पुरुषः** न देशान्तरे विज्ञेयो **यस्मिन् एताः** उच्यमानाः **षोडश कलाः** प्राणाद्याः **प्रभवन्ति** उत्पद्यन्ते **इति**।

षोडश-कलाभिः उपाधि-भूताभिः सकल इव निष्कलः पुरुषः लक्ष्यते अविद्ययेति,

तदुपाधि-कलाध्यारोपापनयेन विद्यया स पुरुषः केवलः दर्शयितव्यः इति कलानां तत्प्रभवत्वमुच्यते।

प्राणादीनाम् अत्यन्त-निर्विशेषे ह्यद्वये शुद्धे तत्वे न शक्यः अध्यारोपमन्तरेण प्रतिपाद्य-प्रतिपादनादि-व्यवहारः कर्तुमिति कलानां प्रभव-स्थित्यप्ययाः आरोप्यन्ते अविद्या-विषयाः।

चैतन्याव्यतिरेकेण एव हि कलाः जायमानाः तिष्ठन्त्यः प्रलीयमानाश्च सर्वदा लक्ष्यन्ते।

अत एव भ्रान्ताः केचिद् अग्नि-संयोगाद् घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायते नश्यति इति। तन्निरोधे शून्यमिव[50] सर्वमित्यपरे। घटादि-विषयं चैतन्यं चेतयितुः नित्यस्य आत्मनः अनित्यं जायते विनश्यति इति अपरे। चैतन्यं भूतधर्मः इति लौकायतिकाः।।

अनपायोपजन-धर्मक-चैतन्यम् आत्मा एव नाम-रूपाद्युपाधि-धर्मैः प्रत्यवभासते।

"सत्यं ज्ञानमनन्तं ब्रह्म (तै.उप. २.१.)", "प्रज्ञानं ब्रह्म (ऐ.उप. ५.३)", "विज्ञानमानन्दं ब्रह्म (बृ.उप. ३.९.२८)", "विज्ञानघनः एव (बृ.उप. २.४.१२)" इत्यादि-श्रुतिभ्यः।

स्वरूप-व्यभिचारिषु पदार्थेषु चैतन्यस्य अव्यभिचारात्। यथा यथा यो यः पदार्थः विज्ञायते तथा तथा ज्ञायमानत्वादेव तस्य तस्य चैतन्यस्याव्यभिचारित्वम्।।

---

[50] पा.भेद - शून्यमेव इति।

वस्तु तत्वं[51] भवति, किंचिन्न ज्ञायते इति च अनुपपन्नम्।

रूपं च दृश्यते, न च अस्ति चक्षुः इति यथा। व्यभिचरति तु ज्ञेयं ज्ञानम्।

न व्यभिचरति ज्ञानं[52] कदाचिदपि ज्ञेयम्। ज्ञेयाभावे अपि ज्ञेयान्तरे भावाद् ज्ञानस्य।

न हि ज्ञाने असति ज्ञेयं नाम भवति कस्यचित्। सुषुप्ते अदर्शनात्। ज्ञानस्यापि सुषुप्ते अभावाद् ज्ञेयवद्

ज्ञान-स्वरूपस्य व्यभिचारः इति चेत्। न। ज्ञेयावभासकस्य ज्ञानस्य आलोकवद् ज्ञेयाभिव्यञ्जकत्वात्

स्व-व्यङ्ग्याभावे आलोकाभावानुपपत्तिवत् सुषुप्ते विज्ञानाभावानुपपत्तेः।

न हि अन्धकारे चक्षुषा रूपानुपलब्धौ चक्षुषः अभावः शक्यः कल्पयितुं वैनाशिकेन।

वैनाशिकः ज्ञेयाभावे ज्ञानाभावं कल्पयत्येवेति चेद् येन तदभावं कल्पयेत् तस्याभावः केन कल्प्यते

इति वक्तव्यं वैनाशिकेन। तदभावस्यापि ज्ञेयत्वाद् ज्ञानाभावे तदनुपपत्तेः।।

---

51 पा.भेद - वस्तु च इति।

52 पा.भेद - ज्ञानमिति पदं नास्ति आनन्दाश्रमे।

ज्ञानस्य ज्ञेयाव्यतिरिक्तत्वाद् ज्ञेयाभावे ज्ञानाभावः इति चेद् न।

अभावस्यापि ज्ञेयत्वाभ्युपगमात्। अभावः अपि ज्ञेयः अभ्युपगम्यते वैनाशिकैः नित्यश्च।

तदव्यतिरिक्तं चेद् ज्ञानं नित्यं कल्पितं स्यात्। तदभावस्य च ज्ञानात्मकत्वाद् अभावत्वं

वाङ्मात्रमेव न परमार्थतः अभावत्वमनित्यत्वं च ज्ञानस्य।

न च नित्यस्य ज्ञानस्य अभाव-नाम-मात्राध्यारोपे किंचिद् नः छिन्नम्।।

अथ अभावः ज्ञेयः अपि सन् ज्ञान-व्यतिरिक्तः इति चेत् - न तर्हि ज्ञेयाभावे ज्ञानाभावः।

ज्ञेयं ज्ञान-व्यतिरिक्तम्, न तु ज्ञानं ज्ञेय-व्यतिरिक्तमिति चेत्।

न। शब्द-मात्रत्वाद् विशेषानुपपत्तेः। ज्ञेय-ज्ञानयोः एकत्वं चेद् अभ्युपगम्यते ज्ञेयं ज्ञान-

व्यतिरिक्तम्, ज्ञानं ज्ञेय-व्यतिरिक्तं न इति तु शब्द-मात्रमेतत्।

वह्निः अग्नि-व्यतिरिक्तः, अग्निः न वह्नि-व्यतिरिक्तः इति यद्वद् अभ्युपगम्यते।

ज्ञेय-व्यतिरेके तु ज्ञानस्य ज्ञेयाभावे ज्ञानाभावानुपपत्तिः सिद्धा।

ज्ञेयाभावे अदर्शनाद् अभावः ज्ञानस्य इति चेत् न। सुषुप्ते ज्ञप्त्यभ्युपगमात्।

वैनाशिकैः अभ्युपगम्यते हि सुषुप्ते अपि ज्ञानास्तित्वम्।

तत्रापि ज्ञेयत्वम् अभ्युपगम्यते ज्ञानस्य स्वैनैवेति चेत् न। भेदस्य सिद्धत्वात्।।

सिद्धं हि अभाव-विज्ञेय-विषयस्य ज्ञानस्य अभाव-ज्ञेय-व्यतिरेकाद् ज्ञेय-ज्ञानयोः अन्यत्वम्।

न हि तत्सिद्धं मृतमिव उज्जीवयितुं पुनः अन्यथा कर्तुं शक्यते वैनाशिकशतैरपि।

ज्ञानस्य ज्ञेयत्वमेव इति तदप्यन्येन तदप्यन्येन इति त्वत्पक्षेऽतिप्रसङ्गः इति चेत् न।

तद्विभागोपपत्तेः सर्वस्य। यदा हि सर्वं ज्ञेयं कस्यचिद् तदा तद्व्यतिरिक्तं ज्ञानं ज्ञानमेव इति द्वितीयो

विभागः एव अभ्युपगम्यते अवैनाशिकैः, न तृतीयः तद्विषयः इत्यनवस्थानुपपत्तिः।

ज्ञानस्य स्वेनैव अविज्ञेयत्वे सर्वज्ञत्व-हानिः इति चेत् सोऽपि दोषः तस्यैव अस्तु किं तन्निर्वहणेन अस्माकम्? अनवस्था-दोषश्च ज्ञानस्य ज्ञेयत्वाभ्युपगमाद् अवश्यं च वैनाशिकानां ज्ञानं ज्ञेयम्। स्वात्मना च अविज्ञेयत्वेन अनवस्था अनिवार्या। समान एव अयं दोषः इति चेत्।

न। ज्ञानस्य एकत्वोपपत्तेः। सर्व-देश-काल-पुरुषाद्यवस्थम्[53] एकमेव ज्ञानं नाम-रूपाद्यनेकोपाधि-भेदात् सवित्रादि-जलादि-प्रतिबिम्बवद् अनेकधा अवभासते इति नासौ दोषः।

तथा च इह इदम् उच्यते।

ननु श्रुतेः[54] इहैवान्तःशरीरे, परिच्छिन्नः कुण्डबदरवत् पुरुषः इति।

न। प्राणादि-कलाकारणत्वात्।

न हि शरीर-मात्र-परिच्छिन्नः[55] प्राण-श्रद्धादीनां कलानां कारणत्वं प्रतिपत्तुं शक्नुयात्।

---

53 पा.भेद - सर्व-देश-काल-पुरुषाद्यवस्थासु इति।

54 इहैवान्तःशरीरे शरीरे इति (६.२)।

कलाकार्यत्वाच्च शरीरस्य। न हि पुरुष-कार्याणां कलानां कार्यं सत् शरीरं कारण-कारणं स्वस्य पुरुषं कुण्ड-बदरमिव[56] अभ्यन्तरीकुर्यात्।

बीजवृक्षादिवत्[57] स्यादिति चेत्। यथा बीज-कार्यं वृक्षः, तत्कार्यं च फलं स्व-कारण-कारणं बीजमभ्यन्तरीकरोति आम्रादि तद्वत् पुरुषमभ्यन्तरीकुर्याद् शरीरं स्व-कारण-कारणमपि इति चेत् न।

अन्यत्वात्, सावयवत्वात् च। दृष्टान्ते कारणाद् बीजाद्[58] वृक्ष-फल-संवृत्तानि अन्यान्येव बीजानि। दार्ष्टान्तिके तु स्व-कारण-कारण-भूतः स एव पुरुषः शरीरे अभ्यन्तरीकृतः श्रूयते बीज-वृक्षादीनां सावयवत्वाच्च स्याद् आधाराधेयत्वं निरवयवश्च पुरुषः सावयवाश्च कलाः शरीरं च।

एतेन आकाशस्यापि शरीराधारत्वमनुपपन्नम् किमुत आकाश-कारणस्य पुरुषस्य तस्मादसमानो दृष्टान्तः।।

---

[55] पा.भेद - शरीर-मात्र-परिच्छिन्नस्य इति आनन्दाश्रमः।
[56] पा.भेद - कुण्डे बदरमिव इति आनन्दाश्रमः।
[57] पा.भेद - बीजादिवदिति।
[58] पा.भेद - कारणबीजादिति आनन्दाश्रमः।

किं दृष्टान्तेन? वचनात् स्यादिति चेत्।

न। वचनस्याकारकत्वात्। न हि वचनं वस्तुनः अन्यथा-करणे व्याप्रियते।

किं तर्हि? यथा-भूतार्थावद्योतने। तस्माद् अन्तःशरीरे इत्येतद्वचनम् अण्डस्यान्तर्व्योमेतिवत् च द्रष्टव्यम्।

उपलब्धि-निमित्तत्वात् च दर्शन-श्रवण-मनन-विज्ञानादि-लिङ्गैः अन्तः-शरीरे परिच्छिन्न इव हि उपलभ्यते पुरुषः। उपलभ्यते च[59]। अत उच्यते अन्तः-शरीरे सोम्य स पुरुष इति।

न पुनः आकाश-कारणः सन् कुण्ड-बदरवत् शरीर-परिच्छिन्न इति मनसा अपि इच्छति वक्तुं मूढः अपि, किमुत प्रमाण-भूता श्रुतिः।। २ ।।

[59] पा.भेद - उपलभ्यते च इति नास्ति क्वचित्। उपलभ्यते च अत्र इत्यधिकं क्वचित्।

“यस्मिन्नेताः षोडश कलाः प्रभवन्ति” इत्युक्तं पुरुष-विशेषणार्थं कलानां प्रभवः।

स च अन्यार्थः अपि श्रुतः केन क्रमेण स्यादिति? अतः इदमुच्यते।

चेतन-पूर्विका च सृष्टिः इत्येवमर्थं च -

**स ईक्षांचक्रे कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि इति।। ३ ।।**

**सः** पुरुषः षोडश-कलः पृष्टः यो भारद्वाजेन **ईक्षांचक्रे** ईक्षणं दर्शनं चक्रे। कृतवान् इत्यर्थः सृष्टि-फल-क्रमादि-विषयम्। कथमिति? उच्यते। कस्मिन् कर्तृ-विशेषे देहाद् उत्क्रान्ते उत्क्रान्तो भविष्यामि अहमेवम्[60], कस्मिन् वा शरीरे प्रतिष्ठिते अहं प्रतिष्ठास्यामि प्रतिष्ठितः स्यामित्यर्थः।

[60] पा.भेद - अहमेव इति।

**पूर्वपक्षः**

ननु आत्मा अकर्ता, प्रधानं कर्तृ, अतः पुरुषार्थं प्रयोजनमुररीकृत्य प्रधानं प्रवर्त्तते महदाद्याकारेण।

तत्रेदमनुपपन्नं पुरुषस्य स्वातन्त्र्येण ईक्षा-पूर्वकं कर्तृत्व-वचनम्, सत्वादि-गुण-साम्ये प्रधाने प्रमाणोपपन्ने सृष्टि-कर्तरि सति, ईश्वरेच्छानुवर्तिषु वा परमाणुषु सत्सु। आत्मनः अप्येकत्वेन कर्तृत्वे साधनाभावाद् आत्मनः आत्मन्यनर्थ-कर्तृत्वानुपपत्तेः च। न हि चेतनावान् बुद्धिपूर्वकार्यात्मनः अनर्थं कुर्यात्। तस्मात् पुरुषार्थेन प्रयोजनेन ईक्षा-पूर्वकमिव नियत-क्रमेण प्रवर्तमाने अचेतने [61]प्रधाने चेतनवदुपचारः अयं "स ईक्षांचक्रे" इत्यादिः। यथा राज्ञः सर्वार्थ-कारिणि भृत्ये राजेति तद्वत्।

**सिद्धान्तः (प्रतिबन्द्युत्तरम्)**

न। आत्मनः भोक्तृत्ववत् कर्तृत्वोपपत्तेः। यथा सांख्यस्य चिन्मात्रस्य अपरिणामिनः अप्यात्मनः भोक्तृत्वं तद्वद्वेदवादिनाम् ईक्षादि-पूर्वकं[62] जगत्कर्तृत्वमुपपन्नं श्रुति-प्रामाण्यात्।

---

[61] पा.भेद - अपीत्यधिकं वा।
[62] पा.भेद - ईक्षापूर्वकमिति।

**आक्षेपः**

तत्वान्तर-परिणामः[63] आत्मनः अनित्यत्वाशुद्धत्वानेकत्व-निमित्तः। न चिन्मात्र-स्वरूप-विक्रिया।

अतः पुरुषस्य स्वात्मन्येव भोक्तृत्वे चिन्मात्र-स्वरूप-विक्रिया न दोषाय। भवतां पुनः वेदवादिनां सृष्टि-कर्तृत्वे तत्त्वान्तर-परिणामः एव इत्यात्मनः अनित्यत्वादि-सर्व-दोष-प्रसङ्गः इति चेत्।

**सिद्धान्तः**

न। एकस्यापि आत्मनः अविद्यायां विषय[64]-नाम-रूपोपाध्यनुपाधिकृत-विशेषाभ्युपगमाद् अविद्या-कृत-नाम-रूपोपाधि-कृतः[65] हि विशेषः अभ्युपगम्यते आत्मनः बन्ध-मोक्षादि-शास्त्र-कृत-संव्यवहाराय। परमार्थतः अनुपाधिकृतं च तत्वमेकमेवाद्वितीयमुपादेयं सर्वतार्किक-बुद्ध्यनवगाह्यम्[66] अभयं शिवमिष्यते। न तत्र कर्तृत्वं भोक्तृत्वं वा क्रिया-कारक-फलं च स्याद् अद्वैतत्वात् सर्व-भावानाम्। सांख्यास्तु अविद्याध्यारोपितमेव पुरुषे कर्तृत्वं क्रिया-कारकं फलं च इति कल्पयित्वा,

---

[63] पा.भेद - तत्वान्तरपरिणामाद् आत्मनः अनित्यत्वाशुद्धत्वानेकत्वनिमित्त-चिन्मात्रस्वरूपविक्रिया इति।

[64] पा.भेद - अविद्याविषयेति। अविद्याकृतेति वा।

[65] पा.भेद - निमित्तः इति।

[66] पा.भेद - अनवगम्यं हि अजमिति।

आगम-बाह्यत्वात् पुनः ततः त्रस्यन्तः परमार्थतः एव भोक्तृत्वं पुरुषस्य इच्छन्ति।

तत्वान्तरं च प्रधानं पुरुषात् परमार्थ-वस्तु-भूतमेव कल्पयन्तः अन्य-तार्किक-कृत-बुद्धि-विषयाः सन्तः विहन्यन्ते। तथा इतरे तार्किकाः सांख्यैः इत्येवं परस्पर-विरुद्धार्थ-कल्पनातः[67], आमिषार्थिनः इव प्राणिनः, अन्योन्य-विरुद्धमानार्थ-दर्शित्वात्[68] परमार्थत्त्वाद् दूरमेव अपाकृष्यन्ते।

अतः तन्मतमनादृत्य वेदान्तार्थ-तत्वम् एकत्व-दर्शनं प्रत्यादरवन्तः मुमुक्षवः स्युः इति तार्किक-मत-दोष-प्रदर्शनं किंचिद् उच्यते अस्माभिः, न तु तार्किकवत् तात्पर्येण। तथैतदत्रोक्तम् -

विवदत्स्वेव निक्षिप्य विरोधोद्भवकारणम्।

तैः संरक्षितसद्बुद्धिः सुखं निर्वाति वेदवित्।।

किंच भोक्तृत्व-कर्तृत्वयोः विक्रिययोः विशेषानुपपत्तिः।

का नाम असौ कर्तृत्वाद् जात्यन्तर-भूता भोक्तृत्व-विशिष्टा विक्रिया, यतो भोक्तैव पुरुषः कल्प्यते,

---

67 पा.भेद - कल्पनात् इति।

68 पा.भेद - विरुद्धमानदर्शित्वादिति।

न कर्ता, प्रधानं तु कर्तृ एव, न भोक्त्रिति? ननु उक्तं पुरुषः चिन्मात्र एव स च स्वात्मस्थः विक्रियते भुञ्जानः, न तत्वान्तर-परिणामेन। प्रधानं तु तत्वान्तर-परिणामेन विक्रियते। अतः अनेकमशुद्धमचेतनं च इत्यादि-धर्मवत्। तद्विपरीतः पुरुषः। नासौ विशेषः, वाङ्मात्रत्वात्। प्राग् भोगोत्पत्तेः केवल-चिन्मात्रस्य पुरुषस्य भोक्तृत्वं नाम विशेषः भोगोत्पत्तिकाले चेद् जायते, निवृत्ते च भोगे पुनः तद्विशेषाद् अपेतः चिन्मात्र एव भवति इति चेत्, महदाद्याकारेण च परिणम्य प्रधानं ततः अपेत्य पुनः प्रधानं स्वरूपेण अवतिष्ठते इत्यस्यां कल्पनायां न कश्चित् विशेषः इति वाङ्मात्रेण प्रधान-पुरुषयोः विशिष्ट-विक्रिया कल्प्यते।

**आक्षेपः**

अथ भोग-काले अपि चिन्मात्रः एव प्राग्वत् पुरुषः इति चेत्।

**समाधानम्**

न तर्हि परमार्थतः भोगः पुरुषस्य।

**आक्षेपः**

भोग-काले चिन्मात्रस्य विक्रिया परमार्थैव तेन भोगः पुरुषस्य इति चेत्।

**समाधानम्**

न। प्रधानस्यापि भोग-काले विक्रियावत्वात् भोक्तृत्त्व-प्रसङ्गः।

**आक्षेपः**

चिन्मात्रस्य एव विक्रिया भोक्तृत्वमिति चेत्।

**समाधानम्**

औष्ण्याद्यसाधारण-धर्मवताम् अग्न्यादीनामभोक्तृत्वे हेत्वनुपपत्तिः।

**आक्षेपः**

प्रधान-पुरुषयोः द्वयोः युगपद् भोक्तृत्वमिति चेत्।

**समाधानम्**

न। प्रधानस्य पारार्थ्यानुपपत्तेः।

न हि भोक्त्रोः द्वयोः इतरेतर-गुण-प्रधान-भावः उपपद्यते प्रकाशयोः इव इतरेतर-प्रकाशने।

**आक्षेपः**

भोग-धर्मवति सत्वाङ्गिनि चेतसि पुरुषस्य चैतन्य-प्रतिबिम्बोदयः अविक्रियस्य पुरुषस्य भोक्तृत्वमिति चेत्।

**समाधानम्**

न। पुरुषस्य विशेषाभावे भोक्तृत्व-कल्पनानर्थक्यात्। भोग-रूपः चेद् अनर्थः पुरुषस्य नास्ति, सदा निर्विशेषत्वात् पुरुषस्य, कस्य अपनयनार्थं मोक्ष-साधनं शास्त्रं प्रणीयते।

**आक्षेपः**

अविद्याध्यारोपितानर्थापनयनाय शास्त्र-प्रणयनमिति चेत्।

**समाधानम्**

परमार्थतः पुरुषः भोक्ता एव, न कर्ता, प्रधानं कर्तृ एव, न भोक्तृ, परमार्थसद् वस्त्वन्तरं पुरुषात् च इति इयं कल्पना आगम-बाह्या, व्यर्था निर्हेतुका च इति नादर्तव्या मुमुक्षुभिः।

**आक्षेपः**

एकत्वे अपि शास्त्र-प्रणयनाद्यानर्थक्यमिति चेद्।

**समाधानम्**

न। अभावात्। सत्सु हि शास्त्र-प्रणेत्रादिषु तत्फलार्थिषु च, शास्त्रस्य प्रणयनमनर्थकं सार्थकं वेति विकल्पना स्यात्। न हि आत्मैकत्वे शास्त्र-प्रणेत्रादयः ततो भिन्नाः सन्ति। तदभावे एवं विकल्पना एव अनुपपन्ना। अभ्युपगते आत्मैकत्वे प्रमाणार्थश्च अभ्युपगतः भवता यदात्मैकत्वं अभ्युपगच्छता। तदभ्युपगमे च विकल्पानुपपत्तिमाह शास्त्रं "यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् (बृ.उप. २.४.१४)" इत्यादि। शास्त्र-प्रणयनाद्युपपत्तिं च आह अन्यत्र परमार्थ-वस्तु-स्वरूपाद् अविद्या-विषये "यत्र हि द्वैतमिव भवति (बृ.उप. २.४.१४)" इत्यादि विस्तरतः वाजसनेयके।।

अत्र च[69] विभक्ते विद्याविद्ये परापरे इत्यादावेव शास्त्रस्य। अतः न तार्किक-वाद-भट-प्रवेशः वेदान्त-राज-प्रमाण-बाहु-गुप्ते इह आत्मैकत्व-विषये इति। एतेन अविद्याकृत-नाम-रूपाद्युपाधि-कृतानेक-शक्ति-साधन-कृत-भेदवत्वाद् ब्रह्मणः, सृष्ट्यादि-कर्तृत्वे साधनाद्यभावः दोषः प्रत्युक्तः वेदितव्यः।

परैः उक्तः आत्मानर्थ-कर्तृत्वादि-दोषश्च। यस्तु दृष्टान्तः 'राज्ञः सर्वार्थकारिणि कर्तर्युपचाराद्[70] राजा कर्ता' इति सः अत्र अनुपपन्नः। "स ईक्षांचक्रे" इति श्रुतेः मुख्यार्थ-बाधनात् प्रमाण-भूतायाः।

तत्र हि गौणी-कल्पना शब्दस्य यत्र मुख्यार्थः न सम्भवति।

इह तु अचेतनस्य मुक्त-बद्ध-पुरुष-विशेषापेक्षया कर्तृ-कर्म-देश-काल-निमित्तापेक्षया च बन्ध-मोक्षादि-फलार्था नियता पुरुषं प्रति प्रवृत्तिः नोपपद्यते। यथोक्त-सर्वज्ञेश्वर-कर्तृत्व-पक्षे तु उपपन्ना।। ३ ।।

---

[69] मुण्डके।

[70] पा.भेद - उपचारवदिति।

ईश्वरेण इव सर्वाधिकारी प्राणः पुरुषेण सृज्यते। कथम्?

**स प्राणमसृजत। प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः अन्नम्।**

**अन्नाद्वीर्यं तपो मन्त्राः कर्म लोकाः। लोकेषु च नाम च।। ४ ।।**

**सः** पुरुषः उक्त-प्रकारेण ईक्षित्वा **प्राणं** हिरण्यगर्भाख्यं सर्वप्राणि-करणाधारम् अन्तरात्मानम् **असृजत** सृष्टवान्। अतः **प्राणात् श्रद्धां** सर्वप्राणिनां शुभ-कर्म-प्रवृत्ति-हेतु-भूताम्। ततः कर्म-फलोपभोग-साधनाधिष्ठानानि कारणभूतानि महाभूतान्यसृजत। **खं** शब्दगुणम्[71]। **वायुं** स्वेन स्पर्शेन कारणगुणेन च विशिष्टं द्विगुणम्[72]। तथा **ज्योतिः** स्वेन रूपेण पूर्वाभ्यां[73] च विशिष्टं त्रिगुणं शब्द-स्पर्शाभ्याम्। तथा **आपः** रसेन गुणेन असाधारणेन पूर्वगुणानुप्रवेशेन च चतुर्गुणाः। तथा गन्धगुणेन पूर्वगुणानुप्रवेशेन च पञ्चगुणा **पृथिवी**।

---

[71] पा.भेद - शब्दगुणकम् इति।
[72] पा.भेद - वायुः स्वेन स्पर्शगुणेन शब्दगुणेन च विशिष्टः द्विगुणः इति।
[73] पा.भेद - पूर्वगुणाभ्याम् इति।

तथा तैरेव भूतैः आरब्धम् **इन्द्रियं** द्विप्रकारं बुद्ध्यर्थं कर्मार्थं च दश-संख्यम्[74]।

तस्य च ईश्वरम् अन्तस्थं संशय-संकल्प-लक्षणं[75] **मनः**। एवं प्राणिनां कार्यं करणं[76] च सृष्ट्वा तत्स्थित्यर्थं व्रीहि-यवादि-लक्षणम् **अन्नम्**। ततश्च **अन्नाद्** अद्यमानाद् **वीर्यं** सामर्थ्यं बलं सर्व-कर्म-प्रवृत्ति-साधनम्। तद्वीर्यवतां च प्राणिनां **तपः** विशुद्धि-साधनं संकीर्यमाणानाम्।

**मन्त्राः** तपोविशुद्धान्तर्बहिःकरणेभ्यः कर्म-साघन-भूताः ऋग्यजुः-सामाथर्वाङ्गिरसः।

ततः **कर्म** अग्निहोत्रादि-लक्षणम्। ततो **लोकाः** कर्मणां फलम्। तेषु **च** लोकेषु सृष्टानां प्राणिनां **नाम** **च** 'देवदत्तः' 'यज्ञदत्तः' इत्यादि। एवमेताः कलाः प्राणिनाम् अविद्यादि-दोष-बीजापेक्षया सृष्टाः, तैमिरिक-दृष्टि-सृष्टाः इव, द्विचन्द्र-मशक-मक्षिकाद्याः स्वप्न-दृक्सृष्टाः इव च, सर्वपदार्थाः पुनः तस्मिन् एव पुरुषे प्रलीयन्ते हित्वा नाम-रूपादि-विभागम्।। ४ ।।

[74] पा.भेद - दशसंख्याकमिति।
[75] पा.भेद - संशयविकल्पादिलक्षणमिति।
[76] पा.भेद - कारणमिति।

कथम्?

**स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्य अस्तं गच्छन्ति।**

**भिद्येते तासां नामरूपे। समुद्र इत्येवं प्रोच्यते।**

**एवमेवास्य परिद्रष्टुः इमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्य अस्तं गच्छन्ति।**

**भिद्येते च आसां नामरूपे। पुरुष इत्येवं प्रोच्यते। स एषः अकलः अमृतः भवति।**

**तदेषः श्लोकः।। ५ ।।**

**स** दृष्टान्तः **यथा** लोके **इमाः** **नद्यः** **स्यन्दमानाः** स्रवन्त्यः **समुद्रायणाः** समुद्रः एव अयनं गतिः आत्मभावः यासां ताः समुद्रायणाः। **समुद्रं** **प्राप्य** उपगम्य **अस्तम्** अदर्शनं नामरूप-तिरस्कारं **गच्छन्ति**। **तासां** च अस्तं गतानां **भिद्येते** विनश्यतः **नामरूपे** गङ्गा-यमुनेत्यादि-लक्षणे तदभेदे **समुद्र** **इत्येवं** **प्रोच्यते** तद्वस्तु उदक-लक्षणम्। **एवं** यथा अयं दृष्टान्तः।

उक्त-लक्षणस्य प्रकृतस्य **अस्य** पुरुषस्य **परिद्रष्टुः** परि समन्ताद् द्रष्टुः दर्शनस्य कर्तुः स्वरूप-भूतस्य।

यथा अर्कः स्वात्मप्रकाशस्य कर्ता सर्वतः तद्वद्। **इमाः** **षोडश** **कलाः** प्राणाद्याः उक्ताः कलाः **पुरुषायणाः** नदीनामिव समुद्रः, पुरुषः अयनं आत्मभाव-गमनं यासां कलानां ताः पुरुषायणाः। **पुरुषं** **प्राप्य** पुरुषात्मभावमुपगम्य तथैव **अस्तं** **गच्छन्ति**। **भिद्येते** च **आसां** **नामरूपे** कलानां प्राणाद्याख्या रूपं च यथास्वम्। भेदे च नाम-रूपयोः यदनष्टं[77] तत्वं **पुरुष** **इत्येवं** **प्रोच्यते** ब्रह्मविद्भिः। यः एवं विद्वान् गुरुणा प्रदर्शित-कला-प्रलय-मार्गः **स** **एषः** विद्यया प्रविलापितासु अविद्या-काम-कर्म-जनितासु प्राणादि-कलासु **अकलः**। अविद्या-कृत-कला-निमित्तः हि मृत्युः। तदपगमे अकलत्वादेव **अमृतः** **भवति**। **तद्** एतस्मिन् अर्थे **एषः** **श्लोकः**।। ५ ।।

[77] पा.भेद - तत् तत्वमिति।

**अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथा इति।। ६ ।।**

**अरा** रथ-चक्र-परिवारा **इव** **रथनाभौ** रथ-चक्रस्य नाभौ यथा-प्रवेशिताः तदाश्रया भवन्ति यथा तथा इत्यर्थः। **कला**ः प्राणाद्याः **यस्मिन्** पुरुषे **प्रतिष्ठिता**ः उत्पत्ति-स्थिति-लय-कालेषु **तं** **पुरुषं** कलानामात्मभूतं **वेद्यं** वेदनीयं पूर्णत्वात् पुरुषं पुरि शयनाद्वा **वेद** जानीयात्।

**यथा** हे शिष्याः **मा** **वो** युष्मान् **मृत्यु**ः **परिव्यथा**ः मा परिव्यथयतु।

न चेद् विज्ञायेत पुरुषः मुत्यु-निमित्तां व्यथाम् आपन्नाः दुःखिन एव यूयं स्थ।

अतः तन्मा भूद् युष्माकम् इत्यभिप्रायः।। ६ ।।

**तान्होवाच एतावदेव अहमेतत्परं ब्रह्म वेद। नातः परमस्तीति।। ७ ।।**

**तान्** एवमनुशिष्य शिष्यान् तान् **ह** **उवाच** पिप्पलादः किल।

**एतावदेव** **वेद्यं** **परं** **ब्रह्म** वेद विजानामि अहम् एतत्।

**न** **अत**ः अस्मात् **परम्** **अस्ति** प्रकृष्टतरं वेदितव्यम् इत्येवमुक्तवान् शिष्याणाम् अविदित-

शेषास्तित्वाशंका -निवृत्तये कृतार्थ-बुद्धि-जननार्थं च।। ७ ।।

**ते तमर्चयन्तः त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि इति।**

**नमः परमऋषिभ्यो नमः परमऋषिभ्यः।। ८ ।।**

ततः **ते** शिष्याः गुरुणा अनुशिष्टाः **तं** गुरुं कृतार्थाः सन्तः विद्यानिष्क्रयमपश्यन्तः किं कृतवन्तः इत्युच्यते - **अर्चयन्त**ः पूजयन्तः पादयोः पुष्पांजलिप्रकिरणेन प्रणिपातेनच शिरसा किं ऊचुः इत्याह - **त्वं हि नः** अस्माकं **पिता** ब्रह्म-शरीरस्य विद्यया जनयितृत्वाद् नित्यस्य अजरामरस्य अभयस्य। **य**ः त्वम् एव **अस्माकम्** **अविद्यायाः** विपरीत-ज्ञानाद् जन्म-जरा-मरण-रोग-दुःखादि-ग्रहाद् अपाराद् अविद्या-महोदधेः विद्या-प्लवेन **परम्** अपुनरावृत्ति-लक्षणं मोक्षाख्यं महोदधेरिव **पारं** **तारयसि** अस्मान् **इति**। अतः पितृत्वं तव अस्मान् प्रति उपपन्नम् इतरस्मात्। इतरः अपि हि पिता शरीर-मात्रं जनयति। तथापि स प्रपूज्यतमः लोके। किमु वक्तव्यम् आत्यन्तिकाभयदातुः इत्यभिप्रायः। **नमः** **परम-ऋषिभ्यो** ब्रह्म-विद्या-संप्रदाय-कर्तृभ्यः **नमः** **परम-ऋषिभ्यः**। इति द्विर्वचनं आदरार्थम्।। ८ ।।

(इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छंकरभगवतः कृतौ प्रश्नोपनिषद्भाष्ये षष्ठः प्रश्नः।।

।। इति प्रश्नोपनिषद्भाष्यम् समाप्तम्।।